श्रीमद्बटोदरमहाराजाश्रयानुगृहीतः

उपनिषद्वाक्यमहाकोशः

UPANIṢAD–VĀKYA–MAHĀ–KOŚA

(PREPARED FROM 223 UPANIṢADS)

ॐ

Vol. I

PREPARED BY:
SHASTRI GAJANAN SHAMBHU SADHALE

ॐ

श्रीमट्टोदरमहराजाश्रयानुगृहीतः

उपनिषद्वाक्यमहाकोशः

[२२३ उपनिषदां वाक्यैः सम्भृतः]

[पूर्वार्धः]

कर्ता—

साधले इत्युपाह्वः शम्भुपुत्रो गजाननः

रूपा बुक्स प्रा. लि.

एस-१२, तिलक नगर शॉपिंग काम्प्लैक्स

जयपुर-३०२००४

ॐ

UPANISAD-VAKYA-MAHA-KOSA

(Prepared from 239 Upanisads)

REPRODUCTION OF EARLIE EDITION OF THE UPANISAD-VAKYA-MAHAKOSA

(PREPARED FROM 223 UPANISADS)

VOL. I

Shastri GAJANAN SHAMBHU SADHALE

RUPA BOOKS PVT. LTD.

S-12, Tilak Nagar Shopping Complex

JAIPUR-302004

The publication has been brought out with financial assistance from Government of India, Ministry of Human Resources Development

If any defect is found in this book, please return the copy by V.P.P. to the publisher for exchange free of cost of postage.

UPANISAD-VAKYA-MAHAKOSA
First Published - 1940
Reprint - 1991

Price Rs. 122-00 per set

Published by
Rupa Books Pvt. Ltd.
S-12, Shopping Complex,
Tilak Nagar, Jaipur - 302 004

Printed at : **Efficient Offset Printer**
New Delhi

अर्पणपत्रिका ।

—**—

श्रीमन्महाराष्ट्रीय–भारतीय–संस्कृतासंरकृतांग्लीयाद्यनेकभाषाभिज्ञानां सम्पादितोप-
युक्तविद्यानां वीर्यशौर्यधैर्यौदार्याद्यखिलगुणगणसम्पन्नानां स्वाचार–विचार–
विहार-सच्चार-दक्षाणां शारद-नादेयतोयचयविशदहृदयानां पितृपिता-
महादिपूर्वजसम्पादिताः ‘ जिन घर-जिन तख्त- सेनाखासखेल
समशेर बहादुर ’ इत्यादिपदवीरनुसृतानां गायकवाड-
वंशविभूषणानां राजाधिराजानां श्रीमद्युवराज-
फत्तेसिंहसुतानां श्रीमतां प्रतापसिंहेत्यभिधा-
नानां राज्ञां कमनीयकरकमलयोरयं
उपनिषद्वाक्यमहाकोषः
सानन्दं सादरं च
समर्प्यते

पितेव रक्षञ्जननीव पोषयन्स्वपुत्रवत्स्वीयजनं च पालयन् ।
अधीतविद्यां च विवर्धयन्सदा राजन्विवर्धस्व भव प्रजार्धिभाक् ॥

UPANIŜAD VĀKYA-MAHĀKOŜA

PRESENTED TO

His Highness

Maharaja Pratapsinha Gaekwar

SENAKHASKHEL, SAMSHER BAHADUR

The noble and just king of Baroda, ever loved and
honoured by his loyal subjects both rich and
poor; A scholar of many languages, like
Sanskrit, English, Hindi and Marathi;
A gentleman endowed with all the
good qualities and virtues, like
honesty, valour, fortitude and
generosity, and very proficient
in Raj-niti, politics
and economics.

By the Author

श्रीमत्प्रतापसिंहनृपत्यभीष्टचिन्तनम् ।

वटोदराभिधे पुरेऽतिरम्यमन्दिरे पुरा
प्रजाप्रियः सुनीतिमान्सुरम्यहर्म्यवासकृत् ।
श्रियान्वितः प्रजावनं विधाय धीरमानितः
सयाजिभूपतिर्यथा शशास गौर्जरीमिलाम् ॥

प्रतापवान्सुबुद्धिमान्सुशीलवान्गुणोदधिः
पितामहेन शिक्षितः सुराज्यसूत्रधारकः ।
श्रिया युतस्तथा सुखं प्रशास्तु गौर्जरीं क्षितिं
प्रतापसिंहभूपतिः शतायुरस्तु वर्धताम् ॥

यद्वत्सयाजिराजः पुण्यश्लोकः स एव राजर्षिः ।
विद्यावदातचरितो विद्यादानव्रतोत्सुकस्त्वनिशम् ॥
वितरन्स्वान्तामोदं विमलीकुर्वन्महीं यशःकिरणैः ।
श्रीफत्तेसिंहसुतो गायकवाडान्वयाभ्रविमलेन्दुः ॥

राजा प्रतापसिंहः पैतामहव्रतपालनौत्सुक्यात् ।
भवतु प्रियः प्रजानां विनयाधानावनादिभिः सुतराम् ॥

सुराजराज्यलब्धतोषराजयः सुधीगणाः
सुखं वसन्तु सद्गुणादिभिः सदा प्रपन्नया ।
श्रिया नता भवन्तु शीलशालिनः प्रजागणाः
सुयोगलब्धिरीदृशी विना कृपां न चेशितुः ॥

PREFACE

The first volume of the Upaniśad Vākya Mahā-Kośa or a Concordance of Upaniśadic sentences is now presented to the Sanskrit knowing public. It will be interesting to note here the circumstances leading to the publication of this helpful but voluminous work.

While working as a Shastri in some leading printing houses of Bombay, I was entrusted by the Gujarati Printing Press to prepare an edition of the Bhagavad Gita with eleven commentaries, mostly unpublished. In making an attempt to trace the original sources of the quotations from the Upaniśads and the Puranas, I found Col. Jacob's concordance useful but not altogether satisfactory. This Concordance was compiled from forty-five Upaniśads only, and is therefore by no means exhaustive, and consequently a large number of citations could not be traced with the help of Col. Jacob's work.

In the eleven commentaries on the Bhagavad Gita citations are made not only from the 108 well known Upaniśads, but also from many others which are either not known or very insufficiently known. This naturally necessitated a patient search for further manuscripts in the archives of the manuscript libraries throughout the length and breadth of India.

The search which proved very successful showed the existence of no less than 223 Upaniśads. These Upaniśads were collected, and a list of sentences occuring in them was made out in an alphabetical order after a sustained labour of several years. It is hardly necessay to mention that this list proved very helpful in tracing the citations occuring in the eleven commentaries on Gita to their original sources. The edition of the Bhagavad Gita was ultimately published by the Gujarati Printing Press, Bombay.

By the time I finished the list of sentences in the 223 Upaniśads in my collection, the number of sentences had already gone beyond forty thousand. Lest this labour of years may go in vain if it be not printed and published, I decided at the advice of my friends and well wishers to print the book as quickly as possible. Being already 72 years of age I was afraid I may not live to see the completion of the work unless I could make things move very fast.

But one thing was wanting, and that was finance. The estimate for printing the book in two volumes came to about six thousand rupees. Six thousand rupees is a staggering sum for a poverty stricken Shastri like myself. Feeling helpless I started for my Patron Deity at Garudeshwar. There I was inspired to approaeh the noble Prince His Highness the Maharaja Pratap Sinh Gaekwar for patronage towards this expensive undertaking

By the grace of God Anant, the Eternal, the help came, and I was granted half of the full cost of production, a sum of three thousand rupees without a

moment's hesitation. It is by the bounty of this generous ruler that the first volume of the Upaniśad Vākya Mahā-Kośa sees the light of the day, to the infinite pleasure of Sanskrit scholars all over the world and the humble author. Officers of the Baroda State like Dr. S. M. Pagar, Dr. B. Bhattacharyya, Dr. S. S. Bhave, actively sympathised with my work, and I record here my deep appreciation of what they have done to further the cause of Indian scholarship.

It will not be out of place to mention here a few details of the life of my chief patron, His Highness the Maharaja Pratap Sinh Gaekwar to whose generosity this work owes its origin, and to whom this work is dedicated as a token of profound gratitude.

× × ×

His Highness the Maharaja was born on the 29th June 1908 at the Motibag Palace in Baroda. He is the son of the late Prince Fateh Sinh Rao, and the grandson of the illustrious Maharaja the late Shri Sayaji Rao Gaekwar. In his early childhood, the young prince lost his parents, and it fell to the lot of his grandfather to replace them both and shoulder all responsibilities for the upbringing of the future king of Baroda.

The late Maharaja Sayaji Rao undertook this task with unparalleled thoroughness in order that the young prince may be well equipped and fitted for the great task of governing a first class State like Baroda.

The Prince's early education was supervised by a band of excellent Indian and European tutors, and his companions were carefully selected from the families of Sardars and officers of the State. He was sent for a time to the Rajkumar College at Rajkot, but was soon brought back to the Baroda High School to take his place as an ordinary school boy and to mix promiscuously with others over whom he was destined to rule.

After his matriculation, the Prince was given College education first at the Baroda College and then in the Deccan College, Poona. Finally the grandfather decided to send him out on a grand tour to Europe to see life at its various phases and gain experience of the world. During the whole tour the Prince led a simple, almost an ascetic life, and did not carry with him even the usual entourage. He worked for himself doing all kinds of odd jobs, even to the length of packing his own things. This tour made a lasting impression on his mind.

Almost immediately on his return he was introduced by his sagacious grandfather into the administration. As Yuvaraja he became the head of the Revenue Department. As experience grew he was given higher and higher importance and responsibility. While under training, he received continuous guidance and advice of able administrators such as Sir V. T. Krishnamachariar, Col. Kumar Shivaraj Singh, Mr. Ramlal H. Desai, Mr. R. S. Mane Patil and others. The Yuvaraja however made his own decisions and always accepted full responsibility for his actions.

Finally, the old Maharaja Sayaji Rao took the Yuvaraja as his own Private Secretary, when he attended such historic events as the Imperial Conference and the Coronation of His Majesty. This new and historic experience gave him wonderful insight into the various constitutional problems of India and his own State. The result of this great experience is already in the process of bearing fruit as is known to all by now.

Besides being an able administrator, the Maharaja is an excellent horseman and a keen Polo player. He takes an active interest in all forms of sports, physical training and hunting.

The new Maharaja is physically sturdy and strong. He is shrewd, observant, deep, thorough and self-reliant; he dislikes sycophancy and half truths. He has natural dignity and his manners are jovial and unassuming. Though quick in grasp and decision, he listens to all patiently and carefully. Endowed with a host of admirable qualities, His Highness the Maharaja Pratap Sinh Gaekwad is most fitted to succed to the noble heritage of his illustrious grandfather whose footsteps he is so scrupulous in following.

The new Maharaja ascended the throne on the 7th of February 1939, and within this short time, he has given ample proof of his future greatness. He gave away a crore of rupees for Village Uplift from his own privy purse, granted permanent remissions of land revenue, and invested his people with liberal constitutional reforms. May God bless the young Maharaja and grant him a long life, continuous fame, honour and prosperity.

× × ×

Besides the help received from His Highness the Maharaja Gaekwad, I have to acknowledge the financial assistance received from the University of Bombay. The authorities of this University granted a sum of Rs. 300/ in 1938 and Rs. 700/- in 1939 towards the cost of production. I am also thankful to the numerous professors, friends and well wishers for their continuous encouragement and sympathy shown in the publication of this work.

In conclusion, I offer this humble work to the lotus feet of Lord Shri Ananta Bhagawan who in his divine grace became instrumental in bringing to light this index of ancient Indian wisdom of the Upaniṣads for the use of the inquisitive readers. HARI : OM TAT SAT

Bombay, Guru-purnima day
19th July, 1940.

Shastri Gajanan Shambhu Sadhle

प्रस्तावः ।

‘महान्तं कोशमुदचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ।। ’*

[—ऋ. मं. ५।८३।८]

अस्त्येतत् समेषां सुरभारतीपरिशीलनबद्धादराणां विपश्चिद्वराणां सुविदितमेव यत् सर्वेऽपि भारतीया आचार्या दार्शनिकादयश्च स्वसिद्धान्तोपष्टम्भकतया तत्र तत्र श्रुतिशिरोवचनान्येव भूम्नोपन्यस्यन्तीति । सर्वेषां हि समयिनामपौरुषेयत्वेनानादिनिधनत्वेन चाभ्युपगता भगवती श्रुतिरेव चरमं परमं च प्रमाणम् । तत्रापि शरीरिणां गात्रेष्विव शिरोभागा एव सर्वतः समुत्कृष्यन्ते श्रुतीनामपि । अक्षय्या निधयः खल्वेतेऽनन्यलभ्यस्य भारतीयानां सविज्ञानस्य ज्ञानस्य । नैकोऽपि कोऽपि विद्यते चतुर्विधपुरुषार्थसाधनोपायेषु तथाविधो योऽमीभिरविसृष्टचर इति निर्देष्टुं शक्यः । एतेषु च रहस्यविद्यानां प्रतिपादनादुपनिषच्छब्देन व्यपदेशः । “उपेत्य नियमयुक्ताय साद्यते उपदिश्यत इत्युपनिषत् । उप-नि-पूर्वात् ‘षद्लृ’ विशरणगत्यवसादनेषु (धा.पा.१.८५४) इत्यस्मात् सम्पदादित्वात् कर्मणि क्विप् । ‘सदिरप्रतेः’ (पा. सू. ८.३.६६) इति षत्वम् । इति ह्युपनिषच्छब्दो निरुच्यते तेन रहस्यार्थस्योपनिषत्संज्ञत्वमुपपद्यते । अत एवार्थशास्त्रे कामशास्त्रे च रहस्यप्रयोगेष्वौपनिषदशब्दः प्रयुज्यते । तादर्थ्याच्च ग्रन्थोऽप्युपनिषदुच्यते । तथा च क्वचित् ‘रसोपनिषत्’ ‘कुचोपनिषत्’ इत्याद्यास्तत्तद्विषयप्रतिपादकग्रन्थानां संज्ञा अपि समुपलभ्यन्ते । परं निरुपाधिक उपनिषच्छब्दः सकलरहस्येभ्योऽपि रहस्यतमां ब्रह्मविद्यामेव मुख्यया वृत्त्याऽभिधत्ते, तत्प्रतिपादिकां च श्रुतिमेव भक्त्येति सर्वसम्प्रतिपन्नमिदम् ।

तथा चाहुः श्रीमद्भगवत्पादाचार्याः–‘उपशब्दो हि सामीप्यमाह । तच्चासति सङ्कोचके प्रतीचि पर्यवस्यति । निशब्दश्च निश्चयार्थः । तस्मादैकात्म्य निश्चितम् । तद्विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते’ (बृ. भा.)। ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यं वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणात् हिंसनात् विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्यते । पूर्वोक्तविशेषणान् मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगात् ब्रह्मविद्योपनिषत् । गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्यापादनेन धात्वर्थयोगाद्ब्रह्मविद्याऽप्युपनिषदित्युच्यते ॥

ननु–उपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति–उपनिषदमधीमहे–अध्यापयाम-इति च । एवम्, नैष दोषः; अविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवात्, विद्यायां च सम्भवात्; ग्रन्थस्यापि

---

* भौमस्यात्रेरार्षम् । स खल्वृषिरनेन मन्त्रेण सकलजगज्जन्मादिविधायकं करुणावरुणालयं भगवन्तं जगतः कल्याणमाशासानः प्रार्थयते—भो जगदीश्वर ! महान्तं कोशं इममुपनिषद्वाक्यमहाकोशम्, उदच उद्गमय, विद्वन्मान्यतापादनादिना समुन्नततमं कुरु । ‘अचु गतौ’ (धा. पा. ८६३) लोट् । किञ्च निषिञ्च स्वकृपामृतधारया सर्वश्रेयोऽभिवर्षिण्याऽभिषिक्तं कुरु ॥ अनेन कर्मणा च कोशप्रणेतुः पितॄणां पुरस्तात् अभिमुखं कुल्याः पयआदीनां नद्यः विषिताः अनवरुद्धाः स्यन्दन्ताम्, अस्य पितॄणामक्षय्या तृप्तिरस्त्वित्यर्थः । तथा चाश्वलायनः—‘यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा उपक्षरन्ति यद्यजूंषि घृतस्य कुल्या, यत्सामानि मध्वः कुल्या, यदथर्वाङ्गिरसः सोमस्य कुल्या, यद्ब्राह्मणानि कल्पान् गाथान्तराशंसीरितिहासपुराणानीत्यमृतस्य कुल्याः’ (गृ. सू. ३. ३. ३.) इति ॥ घृतेन अमृतरसेन गव्येन च द्यावापृथिवी दिवं च पृथिवीं च व्युन्धि विशेषेण क्लेदय ‘उन्दी क्लेदने’ (धा.पा.७.२०) लोट् । कोशकर्त्रे स्वर्लोकेऽमृतं भूलोके घृतं तत्सदृक्कृतं पयोदध्यादि च प्रभूतमुपतिष्ठतु; स इहामुत्र सुखमृच्छत्विति भावः । तथा चात्र मन्त्रान्तरम्–‘घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ।(ऋ.सं.४.५८.१इति, ‘तस्मै सरस्वतीदुहे क्षीरं सर्पिर्मधूदकम् ।’ (ऋ. सं. ९. ६७. ३२) इति चानुसन्धेयम् ॥ अघ्न्याभ्यो गोभ्यः सुप्रपाणं सम्यक्पातव्यमुदकं भवतु । काले वर्षतु पर्जन्यः । गोभ्यः शिवं स्वस्ति चास्त्वित्यर्थः ॥

तादर्थ्येन तच्छब्दत्वोपपत्तेः, 'आयुर्वै घृतम्' इत्यादिवत्। तस्मात् विद्यायां मुख्यया वृत्त्योपनिषच्छब्दो वर्तते, ग्रन्थे तु भक्त्या इति (कठभा.)। तैत्तिरीयोपनिषद्दीपिकायां सायणाचार्या अपि "अत्र ह्युपनिषच्छब्दो ब्रह्मविद्यैकगोचरः। तच्छब्दावयवार्थस्य विद्यायामेव सम्भवात्॥ उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते। सामीप्यात्तारतम्यस्य विश्रान्तेः स्वात्मनीक्षणात्॥ त्रिविधः सदिधात्वर्थो विद्यायां सम्भविष्यति। श्रीमत्सुरेश्वराचार्यैर्विस्पष्टमिदमीरितम्॥ उपनीयेममात्मानं ब्रह्मापास्तद्वयं स्वतः। निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत्॥ निहत्यानर्थमूलां स्वाविद्यां प्रत्यक्तया परम्। गमयत्यस्तसम्भेदमतो वोपनिषद्भवेत्॥ प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः। यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता" इति॥ 'यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदभेदतः। भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा॥' इति। ताश्चैता उपनिषदो गीर्वाणसारस्वतसरस्वति महार्घा मणय इवापरिमिता एव विद्योतन्ते। परमिदानीं बहूनां श्रुतिशाखानामुच्छिन्नत्वात्; विद्यमानानामप्यङ्गुलीमेयानामाशिरोऽन्तर्धीयमानत्वात्, अन्यैश्च तैस्तैः कलिकालमात्रसुलभैर्वेदोच्छेदकैरुपप्लवैर्विप्लुतत्वाच्चादरणीयतरा अपि, अनादिनिधनत्वेन प्रसिद्धा अपि, प्रायो दुष्प्रापदर्शना एवैता वाङ्मय्यो भगवतस्तनवः।

यद्यप्यद्यत्वे क्वचिदष्टाविंशतिः, क्वस्वित् द्वात्रिंशत्, क्वचनैकसप्ततिः, अन्यत्राष्टोत्तरं शतम्, इत्याद्यनेकत्रोपनिषदः प्रकाशिता दृश्यन्ते; तथापि ताः प्रायशोऽशुद्धिबाहुल्यासंविभक्तत्वासम्पूर्णत्वादिदुरन्तदोषग्रस्ततया न मनीषिणां मनोरथान् पूरयितुं पारयन्ति।

न च तावता सर्वासां संग्रहोऽपि भवति, तत्रानुपलभ्यमानानां भूयसां वचसां ग्रन्थकृद्भिरुदाहृतत्वेन तदधिकोपनिषत्सत्त्वानुमानात्। दृश्यन्ते च वैदेशिकेन 'फारकर' नाम्नाऽनेकग्रन्थपर्यालोचनादिना 'रिलिजिअस लिटरेचर ऑफ् इंडिया' इत्यत्र प्रकाशितायां सूच्यां त्रयोविंशत्यधिकशतसंख्यान्युपनिषन्नामानि। उपलभ्यन्ते च क्वचित् क्वचित् तद्व्यतिरिक्तान्यपि पुस्तकानीत्यावश्यकस्तत्संग्रहे प्रयत्नः।

किञ्च प्रकाशितानामप्यासामिदानीमध्ययनाभावेन तदसम्भवेन चाभीष्टवाक्यमन्त्रादीनां स्थानाभानदौःस्थ्यं तदवस्थमेव। तेन अतर्कसाध्याध्यात्मविद्याविषयान् निबन्धान् श्रुत्येकोपष्टम्भानि शारीरादिभाष्याणि, भामतीश्रुतप्रकाशिकादिव्याख्याः, अन्यांश्चैवंविधान् प्रबन्धानधीयानाः, द्वैताद्वैतादिदार्शनिकग्रन्थांस्तुलनयाऽभ्यस्यन्तः, विशेषतस्तादृशग्रन्थानां संशोधकाश्च तत्रोदाहृतोपनिषद्वाक्यसन्दर्भशुद्धिवञ्चितास्तत्त्वार्थावधारणे कियत् क्लिश्नन्तीति तथाविधा एव बुधा बुध्येरन्। ईदृश्युपनिषदां विषमावस्थैव केषांचन दुर्दुरूढानां परमाप्ततया प्रतीतैरप्याचार्यपादादिभिरुदाहृतेषु वाक्येष्वमूलत्वारोपणे, अपरेषां साहसिकशिरोमणीनां स्वकपोलकल्पितवचसामपि श्रुतित्वेन जल्पने चावसरं वितरतीति सर्वेषामेवास्तिकानामत्यावश्यकं तद्दूरीकरणम्। न च तत्र यावदुपलभ्यमानानामशेषाणामप्युपनिषदां संग्रह-संविभाग-संशोधनपूर्वकं प्रकाशनं; तदन्तर्गतनिखिलवाक्यानां वर्णानुक्रमानुसारिसूचीनिर्माणं चान्तराऽपरः कोऽप्युपाय इति सर्वसम्प्रतिपन्नम्। किंतु 'वक्तुं सुकरमेतत्, कर्तुं दुष्करम्' इति पश्यन्त अद्यावधि केऽपि लब्धवर्णमणयोऽस्मिन् कर्मणि प्रावर्तिषत, परमिदानीं—मन्यामहे परिणाममुपेयुषां पण्डितानां पुण्यपुञ्जेन प्रेरितः—ता एता उपनिषदामौपनिषदानां चापद एकपद एवापाकर्तुं सम-नह्यत्संख्यावतामग्रेसरः श्रीमान् 'शम्भुसूनुर्गजाननशास्त्री साधले' महाभागः। व्यतानीच्च नातिचिरादिव भगवतः श्रुतिरक्षादीक्षितस्य क्षीरसागरसुताजानेरनुकम्पामात्रसहायः श्लाघनीयतमं बृहदुपनिषत्संग्रहमिममुपनिषद्वाक्यमहाकोशं चेति चिरायाधमर्णमस्य सकलमपि कृति कुलं जानीमः। वयसा स्थविरतरस्याप्यध्यवसायवता मनसा यूनोऽतिशयानस्य, धनेन दुर्गताग्रगण्यस्याप्यनवद्यया विद्यया लक्ष्मणस्य प्रापञ्चिकसुखवञ्चितस्यापि सदा स्वानन्दनिर्भरस्यास्य शास्त्रिमहोदयस्यात्र प्रवृत्तिवृत्तान्तस्य परिचयः 'न्यूनातिरिक्तं यत्किञ्चित्' इति तन्निवेदनतोऽवगन्तव्यः।

एवमतिमहता यत्नेन सम्भृता अपि ता उपनिषदः काश्चिदतिजरत्तरमातृकतया करग्रहणमपि सोढुमक्षमः काश्चिदसंविभक्तवाक्यतयार्थावबोधनेऽसमर्थाः, काश्चिदशुद्धजालजटिलतया पठनेऽप्यपर्याप्ताः, काश्चिच्च तैस्तैः

अनभिज्ञलिखितग्रन्थैकमुलभैर्दोषविशेषैराक्रान्ता अभूवन्। ताश्चात्रभवता शास्त्रिप्रवीरेण सूक्ष्मेक्षिकया संशोध्य यथोचितं संविभज्य, तच्छुद्धपाठानुन्नीय, यावद्बुद्धिबलं पूर्वोदितं दोषजालमपनीय, तथा संस्कृता यथा मुद्रणयन्त्राधिरोहणं प्रतीक्षमाणास्तिष्ठन्ति ; अयं च तत्रत्यानां सर्वेषामेव वाक्यानामकारादिवर्णक्रमेण विहितः कोशस्तद्गुणपरिमलवाहः पृषदश्व इव तत्रभवतः सहृदयानुपतिष्ठत इति कथं वायं महात्मा शास्त्रिशिरोमणिः स्वपितृद्धरणमात्रार्थमधिगसुधं समानीतसकललोकैकपावनसुरसरित्सलिलस्य नानुकरोतितरां भगीरथस्य ?

अथैवं सरस्वतीनिसर्गमात्सर्यशालिन्या लक्ष्म्या कदाचिदकटाक्षितेन, जठरपिठरपूरणाय व्यवसायान्तरं श्रितवता, स्वयशोराशिविशदपलिताक्रान्तशिरसा, यस्यां जाग्रति भूतानि तस्यामिव या निशा सर्वभूतानां तस्यामपि जाग्रता, शास्त्रिमहाशयेन भूयसः क्लेशाननुभूय निर्माय निर्माल्यमुपहृतमिममुपनिषद्वाक्यकुसुमकोशं स्वकरकिसलयैः स्वीकृत्याश्वेव सफलीकरिष्यन्त्येतस्य परिश्रमान् कोविदकल्पद्रुमा इत्याशास्महे।

ये चात्र केचिद्दोषाः सम्भवेयुस्ते कर्तुरसहायतां च जराशिथिलतां च साधनसामग्रीविकलतां च तथाऽस्य कर्मणोऽपि विशालतां च विषमतां च मानुषमनीषाया अल्पविषयतां च समालोच्य मर्षणीयाः करुणार्णवैर्लब्धवर्णवरेण्यैरिति तान् साञ्जलिबन्धमभ्यर्थयामः।

अन्ततश्च वयसेव विद्यया तयेव नयविनयाभ्यां ताभ्यामिव गुणैश्च गरिष्ठमपि सौजन्यातिशयेन सुहृदायमानमीदृशानेककर्मसु व्यापृतं श्रीमन्तं शम्भुसूनुं गजाननशास्त्रिगमनामयेन द्राघीयसायुषा यशसा श्रिया च समेधयितुं भगवन्तमगजाननलिनभास्करं महेश्वरं सम्प्रार्थ्य तेन सप्रयेवाविश्चिकीर्षितं 'बृहदुपनिषत्संग्रहं' प्रतीक्षमाणा एतावत्येव तिष्ठासामः।

'दोषैर्द्विषन्तश्च गुणैर्महान्तस्तुष्यन्तु सन्तः सुखमस्मदीयैः।
अन्तर्द्वयेषामपि सन्तमेषां जानीमहे प्रीतमनन्तमेकम्॥'

महाशालिक्षेत्रम्.
शके १८६२ वटपूर्णिमा

दीर्घदर्शिनामाश्रवः—
धूपकरोपाह्वोऽनन्तयज्ञेश्वरशर्मा।

न्यूनातिरिक्तं यत्किञ्चित्।

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥

अनन्तकोटिब्रह्माण्डनायकस्यानन्तभक्तजनाज्ञानान्धतमसविध्वंसकस्यानन्तार्तिहरस्य सच्चिदानन्दमयस्यानन्तासनस्य भगवतः श्रीमदनन्तस्य कृपालवलेशात्स्वान्तःस्फुरितं तत्प्रसादभूतं श्रुतिमनोनयनाह्लादकरं कमनीयकमलकोशमिवेममुपनिषद्वाक्यमहाकोशं विद्वद्वरकरकमलेषूपहारीकर्तुं मम मनोभास्करोऽयानन्तानन्दोदयाचलं समुदितस्तत्प्रमोदसन्दोहावहमिति को न मन्येत ?

श्रीमद्विद्वदग्रेसरैः परोपकृतिमद्भुतैर्धूपकरेत्युपाह्वैरनन्तशास्त्रिभिः स्वोद्यमभारं दूरतोऽपसार्यास्योपनिषद्वाक्यमहाकोशस्य प्रस्तावलेखनेनोपकृतोऽहं प्रभाकरप्रभया खद्योत इव लेखनासमर्थोऽपि तदनुज्ञया तच्छन्दैरेव किञ्चिल्लेखनधाष्ट्यं कर्तुमुद्युक्तः स्वोद्देश्यादि स्फुटीकर्तुम्, तत्क्षमापयितुमर्हन्ति ते क्षमाशीलाः।

उपनिषद्वाक्यमहाकोशस्य प्रादुर्भावः परिचयश्च।

नव वा दश वर्षाणि व्यतीतानि भवेयुस्तत्प्रागेव 'गुजराती' मुद्रणालयाधिपतिभिर्मामाहूयोक्तं 'शाङ्करभाष्याद्येकादशटीकोपेता श्रीमद्भगवद्गीता मुद्यतेऽस्माभिः। परं च तद्भाष्य-व्याख्यादि-प्रणेतृभिस्तत्र तत्र स्वस्वमतसमर्थनपराणि वेदवेदाङ्गश्रुतिस्मृतिपुराणेतिहासादिभ्यो यानि वाक्यानि समुद्धृतानि भवेयुस्तेषां मूलस्थलाङ्कनिर्देशनेन तत्तदादर्शभूतप्रत्यन्तरादिभ्योऽशुद्धिनिरसनपूर्वकं विशेषाविशेषनिदर्शनेन च परिच्छेदस्थलास्वल्पविरामचिह्नैश्च तां विभूष्य सा मुद्रणीयेत्यस्माकं मनस्युत्कटा मनीषा समुद्भूता तां सफलीकर्तुमर्हथ' इति। तथेत्युक्त्वा तत्कर्तुमुद्युक्तोऽहं श्रीमद्भगवद्गीतायास्तत्तट्टीकाकारैस्तत्र तत्र वेदादिग्रन्थेभ्यः समुद्धृत-

वाक्यानां स्थलनिदर्शनेन न तथा परिश्रान्तोऽस्मि यथोपनिषद्वाक्यस्थलाङ्कनिदर्शनेन। एवमस्मिन्नारब्धकार्ये मासद्वयावच्छिन्नागाधचिन्ताम्बुधेरतितरतरलतरङ्गनिकरेषु निमग्नमानसोऽभूवम्।

तत एकस्मिन्दिने नयननाराचवसुविधुतमे (१८५२) शकाब्देऽनन्तप्रियायामनन्तचतुर्दश्यां कृतानन्तार्चनोपासनस्य "को मम चिन्ताग्रहग्रस्तस्य हस्तावलम्बदानेनास्मात्समुद्धर्ता भविता? 'अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव!। अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते॥' इत्यनन्तभक्तैरनन्तस्तवैः स्तुतोपासितानन्तगुरो 'त्वमेवेदानीं ममाप्यनन्तापत्समुद्धर्ता गुरुः शरणं भव' इति प्रार्थयमानस्यार्धरात्रेऽर्धसुप्तस्यापि मम मनसि श्रीमदनन्तानुग्रहतश्चिन्तापद्मनध्वान्तविध्वंसकोऽयं चिन्तामणिः प्रादुरभूद्यदहमेवोपनिषद्वाक्यकोशस्य सम्यक्प्रणयनं कुर्यां तर्हि मदीयमप्यारब्धकार्यं सफलं भवेल्लोकसंग्रहश्चापीति। ततस्तदैवोत्थाय कृतानन्तानन्तप्रणामोऽहं मुद्रिताष्टोत्तरशतोपनिषद्गतामीशावास्योपनिषदमारभ्योपनिषद्वाक्यमहाकोशहेतोस्तद्वाक्यावलीलेखनं विधातुमुद्युक्तः।

चतुःपञ्चोपनिषदां वाक्यलेखनानन्तरं लिखितेषु वाक्येष्वपशब्दितं गलिताद्दिं च दृष्ट्वा तद्दूरीकर्तुमनसा पितृपितामहादिसंग्रहीतग्रन्थेषु विचिन्वता मयाऽतिजीर्णं हस्तलिखितं अष्टाक्षरमष्टोत्तरशतोपनिषद्भिन्नमुपनिषद्द्वयं समुपलब्धम्। तदवलोक्य 'एतदतिरिक्ता अन्या अप्युपनिषदोऽत्र मुम्बापुरस्थबृहत्पुस्तकालयेऽन्यत्र च स्युः' इत्याशाङ्कुरो मद्धृदाकाशेऽङ्कुरितः। परन्तु तल्लाभः प्रयत्नापेक्षः, प्रयत्नस्तु शक्त्यवसरद्रव्यापेक्षः, तद्धीनेनापि यथाशक्ति शनैः शनैः प्रयतितं मया। 'प्रसादचिह्नानि पुरःफलानि' (र. वं. २।२२) इति श्रीमन्महाकविकुलगुरोः कालिदासस्योक्तिस्तत्प्रसङ्गानुसारेण सूपयुक्तैव, तथापि 'प्रयत्नचिह्नानि पुरःफलानि' इत्यपि केनचित्कविवरेण यत्रकुत्रचिदुक्तं स्याच्चेत्तदपि युक्ततरमेवेत्यहं मन्ये, मत्कृतप्रयत्नामृतधारासिञ्चनेन मदाशांकुरस्य महावृक्षीभूतत्वात्। तासामत्यन्तायासलब्धानामुपनिषदां परिसङ्ख्यानं विंशोत्तरशतद्वयात्मकमभूत्। तासामयमुपनिषद्वाक्यमहाकोशः समजनि, तत्प्रेक्षासमकालमेव प्रेक्षावतां विद्वद्वराणामामोदातिभूमिमारोहेदेवासंशयम्। तद्गतं पुरुषसूक्तं ऋग्यजुरादिवेदान्तर्गतमप्युपनिषदेवेति निर्विवादं निश्चितं मत्वा तद्वाक्यैरयं कोशः समलङ्कृतोऽस्माभिः "पुरा मत्पुत्र! पुरुषसूक्तोपनिषद्रहस्यप्रकारं निरतिशयाकारावलंबिना विराट्पुरुषेणोपदिष्टं रहस्यं ते विविच्योच्यते" इति नारदपरिव्राजकोपनिषदि (उप. २) ब्रह्मणा नारदायोक्तत्वात्। तथैव "त्रिसुपर्णोनिषदः पठनात् पंक्तिपावनः... त्रिसुपर्णश्रुतिर्ह्येषा निष्कृतौ त्रिदले रता" इति द्वितीयबिल्वोपनिषदि दृष्टत्वात्तद्वाक्यैरप्ययं विभूषित इति ज्ञातव्यं विचक्षणैः। अस्मत्सङ्कलितबृहदुपनिषत्संग्रहे सश्रीसूक्त एत आलोचयतामालोचनगते भविष्यत एवेति।

अत्र केचिद्वदन्ति—'उपनिषदस्तु दशैव त्रयोदश वा, या अबोधशब्दसुबोधाय श्रीमच्छङ्कराचार्यवर्यैः प्रायशः शब्दशो व्याख्याताः, यदीतरास्तत्कालीना भवेयुस्तर्हि ता अपि कथं न तद्व्याख्याविभूषिता दृग्गोचरतामायान्ति?' इति। तदसत्। श्रीमच्छङ्करानन्द-नारायण-रामतीर्थादि-यतिवरैश्चत्वारिंशदधिकानामथर्वशिखाद्युपनिषदां कृतानि व्याख्यानानि दृश्यन्ते। तत्र श्रीमद्यतिवर-नारायणस्वामिपादैस्तु प्रत्युपनिषद्व्याख्यानस्यादावन्ते च 'नारायणेन रचिता श्रुतिमात्रोपजीविना' इत्यनेन पद्येन स्वीयाचारकृतयः श्रुतिपराः समर्थिताश्च दृश्यन्ते। अत ईशावास्यादित्रयोदशोपनिषदामिव तदितरासां श्रुतिमयत्वसिद्धेर्दर्शनात्॥ ॥ केचिद्वैयाकरणाचार्या नैयायिकादयश्च लिखितकतिपयोपनिषद्गतमपशब्दितं ह्रस्वदीर्घादिकं च लेखकप्रमादोद्भूतं स्यादिति जानन्तोऽपि नाङ्गीकुर्वन्ति तत्समीकर्तुं कथयन्ति च यथादृष्टश्रुतमेव मुद्रणीयं, न वयं तत्र हस्तप्रक्षेपं कर्तुं शक्नुम इति। तथापि मया लेखकप्रमादोद्भूतो हस्तदोषोऽयमिति निश्चित्यादिमान्तिमसम्बन्धमनतिक्रम्य तद्गतामशुद्धिप्रचुरतां यथामति दूरीकृत्य तद्वाक्यान्यत्र समावेशितानि। आस्तां तावत्, प्रकृतमनुसरामः।

अत्रोल्लिखितानामुपनिषदां प्राचीनार्वाचीनत्वं, तद्व्याख्यातॄणां परिचयः, उपनिषद्गतास्फुटशब्दार्थपरिज्ञानं, अनेकार्थात्मादिशब्दा यत्र यत्रोपयुक्तत्वेनोपनिषत्सु दृग्गोचरा भवन्ति तेषां स्थलनिर्देशः, उपनिषदुपलब्धिस्थानादि चैतद्विषयाणामत्रोल्लेखनमावश्यकमपि तद्यथावसरं यथामत्यस्योत्तरार्धे विद्वदग्रेसराणामग्रे निधापयिष्यामः, उत्तरार्धस्याप्यविलम्बिततया मुद्रणावश्यकत्वात्। बृहदुपनिषत्संग्रहेण साकमचिरादेव तत्सर्वं प्रकाशीभविष्यत्येव।

आदिमपाठ्यविषयाः ।

एतदुपनिषत्कोशोपयुक्तताजिज्ञासुभिः संस्कृतसारस्वतोपासकैः पण्डितवर्यैः शास्त्रि-पौराणिक-प्रवचनकर्त्रादिभिश्च प्रथमं ज्ञातृज्ञेयज्ञानात्मानात्मात्मीय-चिच्चित्तचिन्तनीय-ध्यातृध्येयध्यान-त्वमहमादिशब्दारम्भितवाक्यानि शुद्ध-सत्त्वान्तःकरणेन प्रविचार्यास्योपयोगिता निर्धार्या ।

१–अत्र सर्वाणि वाक्यान्यकारादिवर्णक्रमेणैव लिखितानि; किन्तु ' ओङ्कारं प्रथमं कृत्वा ततो ब्रह्म प्रवर्तयेत् । अन्यथा विपरीतं तद्ब्रह्म स्यान्नात्र संशयः (प्रयोगपारिजाते यमः) इति धर्मशास्त्रानुशासनात्, श्रुत्यध्ययनस्य सर्वत्रोङ्कारपूर्वकत्वात्, उपनिषदामपि श्रुतिविशेषत्वाच्च प्रणवादीनि वाक्यानि प्रथमं निवेश्य ततोऽकारादि-क्रम आदृतः । २–(?) ईदृक् चिह्नादिमद्वाक्यं ' जेकब् ' महोदयकृतोपनिषच्छब्दकोशादुपात्तम् । एवंविधानि वाक्यानि च 'घ' वर्णादिवाक्यपर्यन्तमेव संगृहीतानि । ३– + इति चिह्नं प्रकृतस्य वाक्यस्यान्यत्रापि निर्दिश्य-मानस्थलेऽवस्थानसूचकम् । ४–एतच्चिह्नमुपात्तवाक्यस्य तस्यामेवोपनिषदि निर्दिष्टस्थानेष्वाम्रेडनबोधकम् । ५ –... इदं विस्तारभयात् त्यक्तानां शब्दानां सूचकम् । ६–अत्र क्वचित् पदच्छेदः पङ्क्त्यायतिपरिजिहीर्षया न विहितः । ७–दूरान्वयवन्ति द्राघिष्ठानि च वाक्यानि– यथाऽऽचार्यैरुदाह्रियन्ते तथा– द्विधा त्रिधा वा कृत्वाऽत्र निवेशितानि । समग्राण्यपि च तानि तत्तदादिवर्णानुसारेण सङ्गृहीतान्येवेति न कैश्चनात्र विप्रति-पत्तव्यम् । ८–वाक्यारम्भप्रधानपदाद्यवर्णमनुरुध्यैव तन्निवेशनं विधाय, तदारम्भगतानि ' अथ– अतः–खलु ' प्रभृतीनि पदानि कुत्रचित् ( ) ईदृक् चिह्नान्तरे लिखितानि । ९–अत्र निर्दिष्टाः खण्डाध्यायाद्यङ्काश्च प्रकाश्य-मानं बृहदुपनिषत्संग्रहमनुसरन्ति । १०–उपनिषदां नामादिसङ्केताश्च सुव्यक्तत्वात् कोशानुशीलनावसर एव बुध्येरन् । ११ मुद्रितामुद्रितोपनिषत्सु कियन्त्यो निरङ्का अपि सन्ति ता यथावसरं यथामति च साङ्काः कृत्वैव तत्तदुपनिषद्वाक्यमत्र लिखितम्, यतस्तद्वाक्योपलब्धिः सुकरा स्यात्तथा यतितमिति वाचकदृक्पथं यास्यत्येव ।

उपनिषद्वाक्यकोशस्यास्य प्रणयनं केन प्रकारेण कथं जातं तदादावेव निर्दिष्टम् । तत्कार्यसमारम्भे प्रसिद्धा-प्रसिद्धा (मुद्रितामुद्रिताः) उपनिषन्मूलभाष्यादिग्रन्था इतस्ततो य उपलब्धास्ते सर्वेऽद्वैतपन्थीयानामेव । ततोऽस्याखिलसाम्प्रदायिनामप्युपयुक्ततासिद्धिं चिकीर्षुणा मया तत्तत्साम्प्रदाय्युपनिषद्ग्रंथा बहुत्रान्वेषितास्तदा केवलं माध्वापरपर्यायिद्वैतपन्थीयाः सभाष्येशावास्यादयो दशोपनिषदः समासादिताः । तदन्तर्गताः पाठभेदा-स्तन्मूलत एवात्र सङ्कलिताः, माध्वभाष्यस्य गद्यपद्यात्मकत्वात्; पद्यात्मके भाष्ये पाठान्तरव्याकृतेरसंभवाच्च । विशिष्टाद्वैतपन्थीयास्ताः सभाष्याः कुत्रचिन्मुद्रिता इति केवलं शुश्रुमः । शुद्धाद्वैतीयानां पुष्टिमार्गीयाणां तु दशोपनिषत्पाठान्तराणि सन्तीति किंवदन्त्याकर्ण्यते, कुत्रचिद्दृष्टान्यपि मया तद्ग्रन्थेषु, परंतु तदाप्तिः सुदुर्लभैव । तथापि यदि तानि मद्भागधेयवशाद्धस्तगतानि भवेयुः, यथोचितस्थलदानेन चात्र विभूषितानि भवेयुस्तर्हि कृतार्थो भवेयम् ।

अन्ततश्च " यैः सङ्कलितसकलसकलविद्यैर्विद्याभिलाषिभिर्विद्याधनदानशौण्डैः श्रीमत्फत्तेसिंहसुतैः प्रतापसिंह-महाराजैर्जराजर्जरितस्य दशैकादशहायनैः कृताखण्डितायासस्य कल्पवृक्षेणेव स्वच्छायाश्रितस्य तवेप्सिततमं पूरयित्वा त्वत्प्रणीत उपनिषद्वाक्यमहाकोशोऽङ्गीकृतः, तेषां कीर्तिकीर्तने सगुणगणधन्यवाददाने च कथं त्वं दशदिक्प्रसारिततद्यशोभास्करकरैश्चकिताचित्तश्चलद्धस्तो जरठः समर्थो भवितुमिच्छसि " इति मम मानसं मां हसति, उपदिशति च मूलसिञ्चनेन वृक्षाग्रं यथोल्लसति सफलीभवति च तथा त्वमपि यैः साधनभूतैर्महाराजः प्रसादितस्तान्छरणीभव " इति । अतस्तानेव सौजन्यशालिनः परोपकृतिपरांस्तत्तदधिकाराधिकृतान् धन्यवादार्हान् रा. रा. शं. म. पगारोपाभिधानान्, ' डॉ. ळेले ' इत्युपाख्यान् डॉ. भट्टाचार्यान्, प्रो. श्री. स. ' भावे ' इत्युपाह्वान्, वि. पा. ' नेने ' इत्याख्यांश्चाहं तत्कृतोपकारभारेण नम्रीभूतः सादरं सप्रेम च संस्तूय निवेदयामि तत्तदुपकारजातातिमहत्यनुकम्पा नहि शक्या कदापि विस्मर्तुमित्यलमतिपल्लवितेन ।

प्राज्ञपादपांसुः—

साधले इत्युपाख्यो शंभुसूनुर्गजाननः

उपनिषन्नामादिसूची ।

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१ अक्षमालोपनिषन्	अ. मा.	वाक्यात्मकः मंत्रात्मकश्च		
२ अक्ष्युपनिषत्	अक्ष्युप. अक्ष्यु.	*वाक्यात्मकः *पद्यात्मकश्च		
३ अथर्वशिखोपनिषत्	अ.शिखो.,अ.शि.	वाक्यात्मकः		
० अथर्ववेदसंहिता	अथर्व.,अथर्व.सं.	कांडात्मकः		
४ अथर्वशिरउपनिषत् (शिवोप. रुद्रोप.)	अ. शिरः.	खंडात्मकः	वाक्यात्मकः मंत्रात्मकश्च	
५ अद्वयतारकोपनिषत्	अद्वयता.,अ.ता.	वाक्यात्मकः पद्यात्मकश्च		
६ अद्वैतप्रकरणम् (मांडू.)	अद्वैत.	पद्यात्मकः		
७ अद्वैतोपनिषत्	अद्वैतो.	वाक्यात्मकः		
८ अद्वैतभावनोपनिषत्	अद्वैत.भा.	वाक्यात्मकः		
९ अध्यात्मोपनिषत्	अध्यात्मो.	वाक्यात्मकः पद्यात्मकश्च		
१० अनुभवसारोपनिषत्	अनु. सा.	वाक्यात्मकः पद्यात्मकश्च		
११ अन्नपूर्णोपनिषत्	अ. पू.	अध्यायात्मकः	पद्यात्मकः	
१२ अमनस्कोपनिषत्	अमन.	अध्यायात्मकः	पद्यात्मकः	
१३ अमृतनादोपनिषत्	अमृतना.,अ.नादो.	पद्यात्मकः		
१४ अरुणोपनिषत्	अरुणो.	मंत्रात्मकः		
१५ अलातशान्तिप्र. (माण्डूक्योपनिषत्कारिकाः)	अ. शां.	पद्यात्मकः		
१६–१ अवधूतोपनिषत्	१ अवधू.	वाक्यात्मकः पद्यात्मकश्च		
१७–२ अवधूतोपनिषत	२ अवधू.	पद्यात्मकः		

* गद्यं पद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधैः । वर्णमात्रप्रभेदेन पद्यं बहुविधं स्मृतम् ॥ पद्यं चतुष्पदी, तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः । वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम् ॥ स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः सम्भूय जायते ॥ ॥ वह्निपुराणे— प्राप्यते ज्ञानकथनं परलोकसुभाषितम् । स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत्सुशोभनम् ॥ वाक्यं मुनिवरैः शान्तैस्तद्विज्ञेयं सुभाषितम् ॥ रागद्वेषानृतक्रोधकामतृष्णानुसारि यत् ॥ वाक्यं निरयहेतुत्वात्तद्भाषितमुच्यते ॥ संस्कृतेनापि किं तेन मृदुना ललितेन वा ॥ अविद्यारागवाक्येन संसारक्लेशहेतुना ॥ यच्छ्रुत्वा जायते पुण्यं रागादीनां च संक्षयः । निरुक्तमपि तद्वाक्यं विज्ञेयमतिशोभनम् ॥ [इति श. चिं. कोशः]

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१८ अव्यक्तोपनिषत्	अव्यक्तो.	वाक्यात्मकः		
१९ आगमप्रकरणम् (मांडूक्योपनिषत्कारिकाः)	आगम.	पद्यात्मकः		
२० आचमनोपनिषत् (आचमनीयो.)	आचम.	वाक्यात्मकः		
२१ आत्मपूजोपनिषत्	आ. पू.	वाक्यात्मकः		
२२ आत्मप्रबोधोपनिषत् (आत्मबोधो.)	आत्मप्र.	वाक्यात्मकः पद्यात्मकश्च		
२३–१ आत्मोपनिषत्	१ आत्मोप.	वाक्यात्मकः		
२४–२ ,,	२ आत्मो.	पद्यात्मकः		
२५ आथर्वणद्वितीयोपनिषत्	आथ. द्वि. आथर्व. द्वि.	वाक्यात्मकः मंत्रात्मकश्च		
० आपस्तम्बश्रौतसूत्रम्	आप. श्रौ.सू.			
२६ आयुर्वेदोपनिषत्	आयुर्वे.	पद्यात्मकः		
२७ आरुणिकोपनिषत् (आरुणेय्युप.)	आरुणि.,आरु.	वाक्यात्मकः		
२८ आर्षेयोपनिषत्	आर्षे.,आर्षेयो.	खण्डात्मकः	वाक्यात्मकः	
२९ आश्रमोपनिषत्	आश्रमो.	वाक्यात्मकः		
३० इतिहासोपनिषत्	इतिहा.	वाक्यात्मकः पद्यात्मकश्च		
३१ ईशावास्योपनिषत्	ईशावा.,ईशा.	मंत्रात्मकः		
३२ उपनिषत्स्तुतिः	[शिवरहस्यान्तर्गताऽद्याप्यलब्धा.		अध्या. ५४]	
३३ ऊर्ध्वपुण्ड्रोपनिषत्	ऊर्ध्वपु. ऊर्ध्वपुं,ऊ.पुं.	वाक्यात्मकः पद्यात्मकश्च		
ऋग्वेदसंहिता	ऋक्सं.,	अष्टकात्मकः	अध्यायात्मकः	वर्गात्मकः
अष्टकात्मिका	ऋ. अ.	,,	,,	,,
मंडलात्मिका	ऋ.मं.	मण्डलात्मकश्च	सूक्तात्मकः	मंत्रात्मकः
० ऋग्वेदखिल.	ऋ.खि.श्री.सू.	मंत्रात्मकः		
३४ एकाक्षरोपनिषत्	एकाक्ष.,ए.उ.	पद्यात्मकः		
३५–१ ऐतरेयोपनिषत्	१ ऐत.	अध्यायात्मकः	खण्डात्मकः	वाक्यात्मकः
३६–२ ,, (आत्मषट्को.)	२ ऐत.	खण्डात्मकः	वाक्यात्मकः	
३७–३ ,,	३ ऐत.	अध्यायात्मकः	खंडात्मकः	वाक्यात्मकः
३८ कठरुद्रोपनिषत् (कण्ठो.)	कठरु.	वाक्यात्मकः पद्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
३९ कठोपनिषत्	कठो.	वाक्यात्मकः	पद्यात्मकः	
४० कठश्रुत्युपनिषत्	कठश्रु.	वाक्यात्मकः		
४१ कलिसन्तरणोपनिषत् (हरिनामोप.)	कलिसं.	वाक्यात्मकः पद्यात्मकश्च		
४२ कात्यायनोपनिषत्	कात्याय.	वाक्यात्मकः		
४३ कामराजकीलितो. द्धारोपनिषत्	कामरा. कामराज.	वाक्यात्मकः		
४४ कालाग्निरुद्रोपनिषत्	कालाग्नि.,का.रु.	वाक्यात्मकः		
४५ कालिकोपनिषत्	कालिको.	वाक्यात्मकः पद्यात्मकश्च		
४६ कालीमेधादीक्षितोप.	का.मे.दी.,का.मे.	वाक्यात्मकः		
४७ कुण्डिकोपनिषत्	कुण्डि. कुंडि. कुंडिको.	पद्यात्मकः वाक्यात्मकश्च		
४८ कृष्णोपनिषत्	कृष्णो.	वाक्यात्मकः पद्यात्मकश्च		
४९ केनोपनिषत्	केनो.	खण्डात्मकः	पद्यात्मकः वाक्यात्मकश्च	
५० कैवल्योपनिषत्	कैव.	खण्डात्मकः	पद्यात्मकः	
५१ कौलोपनिषत्	कौलो.,कौलोप.	वाक्यात्मकः		
५२ कौषीतकिब्राह्मणोप.	कौ.उ.,कौ.त.	अध्यायात्मकः	वाक्यात्मकः	
५३ क्षुरिकोपनिषत्	क्षुरिको.	पद्यात्मकः		
५४ गणपत्यथर्वशीर्षोपनिषत्	गणप.	वाक्यात्मकः		
५५ गणेशपूर्वतापिन्युपनिष. (वरदपूर्वतापिन्यु.)	ग. पू.	उपनिषदात्मकः	वाक्यात्मकः	
५६ गणेशोत्तरतापिन्यु. (वरदोत्तरतापिन्यु.)	ग. शो.	उपनिषदात्मकः	वाक्यात्मकः	
५७ गर्भोपनिषत्	गर्भो.	वाक्यात्मकः		
५८ गान्धर्वोपनिषत्	गान्धर्वो.	वाक्यात्मकः		
५९ गायत्र्युपनिषत्	गायत्र्यु.	वाक्यात्मकः		
६० गायत्रीरहस्योपनिषत्	गायत्रीर.	वाक्यात्मकः		
६१ गारुडोपनिषत्	गारुडो.	पद्यात्मकः मंत्रात्मकश्च		
६२ गुह्यकाल्युपनिषत्	गुह्यका.	पद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
६३ गुह्यषोढान्यासोपनिषत्	गुह्यषो.,गु.षो.	वाक्यात्मकः		
६४ गोपालपूर्वतापिन्युपनिषत्	गो. पू.	गद्यपद्यात्मकः		
६५ गोपालोत्तरतापिन्यु.	गोपालो.	खण्डात्मकः	गद्यपद्यात्मकः	
६६ गोपीचन्दनोपनिषत्	गोपीचं.	वाक्यात्मकः पद्यात्मकश्च		
६७ चतुर्वेदोपनिषत्	चतुर्वे.	वाक्यात्मकः पद्यात्मकश्च		
६८ चाक्षुषोपनिषत्	चाक्षुषो.	मंत्रात्मकः		
(चक्षुरुप., चक्षूरोगोप., नेत्रोपनिषदिति नामान्तराणि.)				
६९ चित्त्युपनि.	चित्त्यु.	खण्डात्मकः	वाक्यात्मकः	
७० छागलेयोपनि.	छाग., छागले.	खण्डात्मकः	वाक्यात्मकः	
७१ छान्दोग्योपनिषत्	छांदो., छान्दो., छां. उ., छां.	अध्यायात्मकः	खण्डात्मकः	वाक्यात्मकः
७२ जाबालदर्शनोपनिषत्	जा. द.	खण्डात्मकः	पद्यात्मकः	
७३ जाबालोपनिषत्	जाबालो.जाबा.,	वाक्यात्मकः		
७४ जाबाल्युपनिषत्	जाबाल्यु.	वाक्यात्मकः		
७५ तारसारोपनिषत्	तारसा.	गद्यपद्यात्मकः मंत्रात्मकश्च		
७६ तारोपनिषत्	तारोप.	वाक्यात्मकः		
७७ तुरीयातीतोपनिषत्	तुरीया.	वाक्यात्मकः		
७८ तुरीयोपनिषत्	तुरीयो.	वाक्यात्मकः		
७९ तुलस्युपनिषत्	तुलस्यु.	गद्यपद्यात्मकश्च		
० तैत्तिरीयमारण्यकं	तै. आ.	मंत्रात्मकः		
८० तेजोबिन्दूपनिषत्	ते. बिं.	अध्यायात्मकः	पद्यात्मकः	
० तैत्तिरीयसंहिता	तै. सं.			
८१ तैत्तिरीयोपनिषत्	तैत्ति.+	वाक्यात्मकः	अनुवाकात्मकः मंत्रात्मकश्च	वाक्यात्मकः
८२ त्रिपाद्विभूतिमहानारायणोपनिषत्	त्रि. म. ना., त्रि. म.	अध्यायात्मकः	वाक्यात्मकः	
८३ त्रिपुरातापिन्युपनि.	त्रि. ता.	उपनिषदात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
८४ त्रिपुरोपनिषत्	त्रिपुरो.	मंत्रात्मकः		

	उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
८५	त्रिपुरामहोपनिषत्	त्रि.म.,त्रि,महो.,	मंत्रात्मकः		
८६	त्रिशिखिब्राह्मणोपनि.	त्रि. ब्रा.	खंडात्मकः	वाक्यात्मकः पद्यात्मकश्च	
८७	त्रिसुपर्णोपनिषत्	त्रिसुप.	मंत्रात्मकः		
८८	दक्षिणामूर्त्युपनिषत्	द. मू.	वाक्यात्मकः		
८९	दत्तात्रेयोपनिषत्	दत्तात्रे.	खण्डात्मकः	वाक्यात्मकः	
९०	दत्तोपनिषत्	(अशुद्धप्रचुरा)			
९१	दुर्वासोपनिषत्	दुर्वासो.	पद्यात्मकः		
९२	१देव्युपनिषत्	देव्यु.	मंत्रात्मकः पद्यात्मकश्च		
९३	२ ,,	[शिवरहस्यान्तर्गताऽप्यद्याप्यलब्धा. अ. ९९]			
९४	द्वयोपनिषत्	द्वयो.	वाक्यात्मकः पद्यात्मकश्च		
९५	ध्यानबिन्दूपनिषत्	ध्या. बिं.	पद्यात्मकः		
९६	नादबिन्दूपनिषत्	ना. बिं.	पद्यात्मकः		
९७	नारदपरिव्राजकोपनि.	ना. प.	उपदेशात्मकः	वाक्यात्मकः पद्यात्मकश्च	
९८	नारदोपनिषत्	नारदो.	वाक्यात्मकः		
९९	नारायणपूर्वतापिन्यु.	ना. पू. ता.	खण्डात्मकः	वाक्यात्मकः	
१००	नारायणोत्तरतापिन्यु.	ना. उ. ता.	खण्डात्मकः	वाक्यात्मकः	
१०१	नारायणोपनिषत् (नारायणाथर्वशीर्षोप.)	नारा.	वाक्यात्मकः		
१०२	निरालम्बोपनिषत्	निरा.,निरा.उ. निरा. लं.	वाक्यात्मकः		
१०३	निरुक्तोपनिषत्	निरुक्तो.	अध्यायात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१०४	निर्वाणोपनिषत्	निर्वाणो.	वाक्यात्मकः		
१०५	नीलरुद्रोपनिषत्	नीलरु.	खण्डात्मकः	मंत्रात्मकः	
१०६	नृसिंहपूर्वतापिन्युपनि.	नृ. पू.	उपनिषदात्मकः	वाक्यात्मकः	
१०७	नृसिंहषट्चक्रोपनिषत्	नृ. षट्च.	वाक्यात्मकः		
१०८	नृसिंहोत्तरतापिन्युपनि.	नृसिंहो.	खण्डात्मकः	वाक्यात्मकः	
१०९	पञ्चब्रह्मोपनिषत्	पञ्चब्र., पं. ब्र.	वाक्यात्मकः पद्यात्मकः		

	उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
११०	परब्रह्मोपनिषत्	परब्र.	वाक्यपद्यात्मकः		
१११	परमहंसपरिव्राजकोप.	प. हं. प.	वाक्यात्मकः		
११२	परमहंसोपनिषत्	प.हंसो.,प.हं.	वाक्यात्मकः		
११३	पारमात्मिकोपनि.	पारमा.	अनुवाकात्मकः	मंत्रात्मकः	
०	पारस्करगृह्य सूत्रम्	पा. गृ. सू.			
११४	पारायणोपनिषत्	पारायणो.	मंत्रात्मकः		
११५	पाशुपतब्रह्मोपनिषत्	पा. ब्र.	वाक्यात्मकः पद्यात्मकश्च		
११६	पिण्डोपनिषत्	पिण्डो.	पद्यात्मकः		
११७	पीताम्बरोपनिषत्	पीतांबरो.	वाक्यात्मकः		
११८	पुरुषसूक्तोपनिषत्	पु. सू.	मंत्रात्मकः		
११९	पैङ्गलोपनिषत्	पैङ्गलो.	अध्यायात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१२०—१	प्रणवोपनि.	१ प्रणवो.	पद्यात्मकः		
१२१—२	,,	२ प्रणवो.	वाक्यात्मकः		
१२२	प्रश्नोपनिषत्	प्रश्नो.	प्रश्नात्मकः		
१२३	प्राणाग्निहोत्रोपनिषत्	प्राणाग्नि., प्रा. हो.	खण्डात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
१२४	बटुकोपनिषत् (बटुकोप.)	बटुको.	वाक्यात्मकः पद्यात्मकश्च		
१२५	बह्वृचोपनि.	बह्वृचो.	वाक्यात्मकः		
१२६	बाष्कलमंत्रोपनि.	बा. मं.	वाक्यात्मकः		
१२७	१ बिल्वोपनि.	१ बिल्वो.	पद्यात्मकः		
१२८	२ ,,	२ बिल्वो.	वाक्यात्मकः पद्यात्मकः		
१२९	बृहज्जाबालोपनि.	बृ. जा., बृहज्जा.	ब्राह्मणात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१३०	बृहदारण्यकोपनि.	बृ.उ., बृह.	अध्यायात्मकः	ब्राह्मणात्मकः	वाक्यात्मकः
१३१	ब्रह्मबिन्दूपनिषत् (अमृतबिन्दूप.)	ब्र. बिं.	पद्यात्मकः		
१३२	ब्रह्मविद्योपनिषत्	ब्रह्मवि.,ब्र.वि.	पद्यात्मकः		
१३३	ब्रह्मोपनि.	ब्रह्मोप., ब्रह्मो.	वाक्यपद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१३४ भगवद्गीतोपनिषत्	भ. गी.	अध्यायात्मकः	पद्यात्मकः	
१३५ भवसंन्तरणोपनि.	भवसं.	अध्यायात्मकः	पद्यात्मकः	
१३६ भस्मजाबालोपनि.	भ.जा., भस्मजा.	अध्यायात्मकः	वाक्यात्मकः	
१३७ भावनोपनि.(कापिलोप.)	भावनो.	वाक्यात्मकः		
१३८ भिक्षुकोपनिषत्	भिक्षुको.	वाक्यात्मकः		
१३९ मठाम्नायोपनिषत्	मठाम्ना.	वाक्यात्मकः		
० महावाक्यरत्नावलिः	म. वा. र.	प्रकरणात्मकः		
१४० मण्डलब्राह्मणोपनि.	मं. ब्रा.	ब्राह्मणात्मकः	वाक्यात्मकः	
१४१ मंत्रिकोपनिषत् (चूलिकोप.)	मंत्रिको.	पद्यात्मकः		
१४२ मल्लार्युपनि.	(अशुद्धप्रचुरा कोशासंगृहीतवाक्या)			
१४३ महानारायणोपनि. (बृहन्नारायणो.—उत्तरनारायणो.)	महाना., म.ना.	खण्डात्मकः	मंत्रात्मकः	
१४४ महावाक्योपनि.	महावा.	वाक्यात्मकः		
१४५ महोपनिषत्	महो.	अध्यायात्मकः	पद्यात्मकः	
१४६ माण्डूक्योपनिषत्	माण्डू.	वाक्यात्मकः		
१४७ मुक्तिकोपनिषत्	मुक्तिको., मुक्ति.	अध्यायात्मकः	वाक्यपद्यात्मकः	
१४८ मुण्डकोपनि.	मुण्डको.,मुण्ड.	मुण्डकात्मकः	खडात्मकः	मंत्रात्मकः
१४९ मुद्गलोपनिषत्	मुद्गलो.	खण्डात्मकः	वाक्यात्मकः मंत्रात्मकः	
१५० मृत्युलांगूलोपनिषत्	मृत्युलां.	वाक्यात्मकः पद्यात्मकश्च		
१५१ मैत्रायण्युपनिषत्	मैत्रा.	प्रपाठात्मकः	वाक्यात्मकः	
१५२ मैत्रेय्युपनिषत्	मैत्रे., मैत्रे.उ.	अध्यायात्मकः	गद्य-पद्यात्मकः	
१५३ यज्ञोपवीतोपनिषत्	यज्ञोप.	वाक्यात्मकः पद्यात्मकश्च		
१५४ याज्ञवल्क्योपनिषत्	याज्ञव.	वाक्यात्मकः पद्यात्मकश्च		
१५५ योगकुण्डल्युपनिषत्	योगकुं.	अध्यायात्मकः	पद्यात्मकः	
१५६ योगचूडामण्युपनिषत्	यो. चू.	पद्यात्मकः वाक्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१५७–१ योगतत्त्वोपनिषत्	१ यो. त.	पद्यात्मकः		
१५८–२ ,,	२ योगत.	पद्यात्मकः		
१५९ योगराजोपनिषत्	योगरा.	पद्यात्मकः		
१६० योगशिखोपनिषत्	यो. शि.	अध्यायात्मकः	पद्यात्मकः	
१६१ योगोपनिषत्	योगो.	पद्यात्मकः		
१६२ राजश्यामला-रहस्योपनिषत्	रा. श्या. र	वाक्यात्मकः		
१६३ राधिकोपनिषत्	राधिको.	वाक्यात्मकः		
१६४ राधोपनिषत्	राधो.	प्रपाठात्मकः	वाक्यात्मकः	
१६५ रामपूर्वतापिन्युपनि.	रा.पू.,रामपू.	उपनिषदात्मकः	पद्यात्मकः	
१६६ रामरहस्योपनिषत्	रामर.	अध्यायात्मकः	पद्यात्मकः वाक्यात्मकः	
१६७ रामोत्तरतापिन्युपनि.	रामो., रामोत्त.	खण्डात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
१६८ रुद्रहृदयोपनिषत्	रुद्रहृ.	पद्यात्मकः		
१६९ रुद्राक्षजाबालोपनि.	रु. जा.	पद्यात्मकः वाक्यात्मकश्च		
१७० रुद्रोपनिषत्	रुद्रो.,रुद्रोप.	वाक्यात्मकः		
१७१ लक्ष्म्युनिषत्	लक्ष्म्यु.	वाक्यात्मकः		
१७२ लांगूलोपनिषत्	लांगूलो.	मंत्रात्मकः		
१७३ लिङ्गोपनिषत्	लिङ्गो.	वाक्यात्मकः		
० वाजसनेयिसंहिता (यजुर्वे.)	वा. सं.	अध्यायात्मकः	मंत्रात्मकः (कंडिकात्मकः)	
१७४ वज्रपञ्जरोपनिषत्	व. पं.	वाक्यात्मकः		
१७५ वज्रसूचिकोप.	व.सू., वज्रसू.	वाक्यात्मकः		
१७६ वनदुर्गोपनिषत्	वनदु.	वाक्यात्मकः पद्यात्मकश्च		
१७७ वराहोपनिषत्	वराहो.	अध्यायात्मकः	पद्यात्मकः	
१७८ वासुदेवोपनिषत्	वासुदे., वासु.	वाक्यात्मकः		
१७९ विश्रामोपनिषत्	विश्रामो.	पद्यात्मकः		
१८० विष्णुहृदयोपनिषत्	विष्णुहृ.	खण्डात्मकः	मन्त्रात्मकः	
१८१ वैतथ्यप्रक. (मांडू.)	वैतथ्य.	पद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१८२ शरभोप.	शरभोपनिषत्	पद्यात्मकः वाक्यात्मकश्च		
१८३ शाट्यायनीयोपनिषत्	शाट्याय.	पद्यात्मकः वाक्यात्मकश्च		
१८४ शाण्डिल्योपनिषत्	शांडि.,शाण्डि., शाण्डिल्यो.,शां.	अध्यायात्मकः	खंडात्मकः	वाक्यात्मकः पद्यात्मकश्च
१८५ शारीरकोपनिषत्	शारीर.	वाक्यात्मकः पद्यात्मकश्च		
१८६—१ शिवसङ्कल्पोपनिषत्	१ शिवसं.	मन्त्रात्मकः		
१८७—२ शिवसङ्कल्पोपनिषत्	२ शिवसं.	मन्त्रात्मकः		
१८८ शिवोपनिषत्	शिवो.	अध्यायात्मकः	पद्यात्मकः	
१८९ शुकरहस्योपनिषत्	शुकर., शु. र.	खण्डात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१९० शौनकोपनिषत्	शौनको.	खण्डात्मकः	वाक्यात्मकः	
१९१ श्यामोपनिषत्	श्यामोप.	वाक्यात्मकः		
१९२ श्रीचक्रोपनिषत् (श्रीमद्भगवद्गीतोपनि.)	श्रीचक्रो.	मंत्रात्मकःवाक्यात्मकश्च		
१९३ श्रीविद्यातारकोपनि.	श्रीवि. ता.	पादात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१९४ श्रीसूक्तम्	श्रीसू.	मंत्रात्मकः		
१९५ श्वेताश्वोपनिषत्	श्वेता.,श्वेताश्व.	अध्यायात्मकः	पद्यात्मकः मंत्रात्मकः	
१९६ षोढोपनिषत्	षोढो.	वाक्यात्मकः		
१९७ सङ्कर्षणोपनिषत्	सङ्कर्ष., संक.	वाक्यात्मकः		
१९८ सदानन्दोपनिषत्	सदानं.	वाक्यात्मकः पद्यात्मकश्च		
१९९ संध्योपनिषत्	सन्ध्यो.	वाक्यात्मकः पद्यात्मकश्च		
२००—१ सन्न्यासोपनिषत्	१ सं. सो.,	अध्यायात्मकः		
२०१—२ सन्न्यासोपनिषत्	२ सन्न्यासो.	वाक्यात्मकः पद्यात्मकश्चः		
२०२ सरस्वतीरहस्योप.	सरस्व.	मन्त्रात्मकः पद्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
२०३ सर्वसारोप. (सर्वोपनि.)	सर्वसारो., सर्वसा.	वाक्यात्मकः		
२०४ सहवै. (सहवाउ.)	सहवै.	वाक्यात्मकः मंत्रात्मकश्च		
२०५ संहितोपनिषत्	संहितो.	वाक्यात्मकः मंत्रात्मकश्च		
२०६ सामरहस्योपनिषत्	सामर.	वाक्यात्मकः		
० सामवेदः	सामवे.			
२०७ सावित्र्युपनिषत्	सावित्र्यु.	वाक्यात्मकः		
२०८ सिद्धान्तविठ्ठलोपनिषत्	सि.वि.	वाक्यात्मकः		
२०९ सिद्धान्तशिखोपनिषत्	सि. शि.	पद्यात्मकः मन्त्रात्मकश्च		
२१० सिद्धान्तसारोपनिषत्	सि. सा.	आवरणात्मकः	वाक्यात्मकः	
२११ सीतोपनिषत्	सीतो.,सीतोप.	वाक्यात्मकः पद्यात्मकश्च		
२१२ सुदर्शनोपनिषत्	सुदर्श.	वाक्यात्मकः पद्यात्मकश्च		
२१३ सुबालोपनिषत्	सुबालो.	खण्डात्मकः	वाक्यात्मकः	
२१४ सुमुख्युपनिषत्	सुमुख्यु.	गद्यात्मकः		
२१५ सूर्यतापिन्युपनिषत्	सूर्यता.	पटलात्मकः	वाक्यात्मकः पद्यात्मकश्च	
२१६ सूर्योपनिषत्	सूर्यो.	वाक्यात्मकः		
२१७ सौभाग्यलक्ष्म्युपनि.	सौभाग्य. सौ. ल.	वाक्यात्मकः पद्यात्मकश्च		
२१८ स्कन्दोपनिषत्	स्कन्दो.	”		
२१९ स्वसंवेद्योपनिषत्	स्वसंवे.	वाक्यात्मकः		
२२० हयग्रीवोपनिषत्	हयग्री.	वाक्यात्मकः		
२२१ हंसषोढोपनिषत्	हं.षोढो.,हंसषो.	मन्त्रात्मकः		
२२२ हंसोपनिषत्	हंसो.	वाक्यात्मकः		
० हिरण्यकेशीगृह्यसूत्रम्	हि. गृ. सू.			
२२३ हेरम्बोपनिषत्	हेरम्बो.	गद्यपद्यात्मकः		

॥ इत्युपनिषदः ॥

ॐ

ॐकारोऽयमजरोऽमरोऽभयोऽमृतः ।

ॐकारेण सर्वा वाक् सन्तृण्णा । ॐकार एवेदं सर्वम् ।

उपनिषद्वाक्यमहाकोशः

ॐ

ॐ ॐ ॐ इति त्रिरुक्त्वा चतुर्थः शान्त आत्माप्लुत...	अ.शिखो. १
ॐ ॐ नमो भगवते नारायणाय	त्रि.म. ना. ७।९
ॐ ॐ नमो भगवते वासुदेवाय	त्रि.म. ना. ७।९
ॐ ॐ वाचि प्रतिष्ठा	बह्वृचो. २
ॐ अं आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः	त्रि.म.ना.७।१०
ॐ अघोराय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः	विष्णुहृ.२।२४
ॐ अकार मृत्युञ्जय सर्वव्यापक प्रथमेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ अदामो ३ पिबा ३ मों देवो वरुणः सविता २	छां.उ.१।१२।५
ॐ अनिरुद्धाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः	विष्णुहृ. २।८
ॐ अपानात्मने ॐ तत्सद्भूर्भुवः सुवः	गोपालो. ३।४
ॐ अहं वृक्षस्य रेरिव	शांतिपाठः
ॐ आकाराकर्षणात्मक सर्वगत द्वितीयेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ आदौ नम उच्चार्य ततो भगवते पदं १	दृ. मू. २

ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्	महाना. ११।७
ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरों [मैत्रा.६।३५+	त्रि.म.ना.७।११
ॐ आपोऽमृतमर्त्यस्य... जन्यते पुरुषोत्तमात्	कृ. पु. सि. ३
ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणः	शांतिपाठः
ॐ इकार पुष्टिद क्षोभकर तृतीयेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ इति तिस्रो मात्राः, एताभिः सर्वमिदमोतं प्रोतं चास्मिन्	मैत्रा. ६।३
ॐ इति प्रतिपद्यन्ते	शौनको. १।५
ॐ इतिप्रयुक्तआत्मज्योतिःसकृदावर्तते	अ. शिखो. १
ॐ इति ब्रह्म [तैत्ति. १।८।१+	ना. प. ८।२
ॐ इति ब्रह्म भवति	तारसा. १।४
ॐ इति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्रवानीति	तैत्ति. १।८।१
ॐ इति ब्रह्मा प्रसौति	तैत्ति. १।८।१
ॐ इति ब्रह्मेति व्यष्टिसमष्टिप्रकारेण	ना. प. ८।१
ॐ इति शंसंति	छां.उ.१।१।९

ॐ इति सत्यम्	१ऐतरे. ३।६।४
ॐ इति संहरन्नानुसन्दध्यात्	नृसिंहो. ४।१
ॐ इति सामानि गायन्ति	तैत्ति. १।८।१
ॐ इति होवाच व्यज्ञासिष्ठा इति [२, ३	बृ. उ. ५।२।१, + ६।२।१
ॐ इति होवाच[बृ.उ.३।९।१,१,१	+६।२।१
ॐ इति ह्युद्गायति तस्योपव्याख्यानं	छां.उ.१।१।१ +१।४।१
ॐ इति होवानुजानाति	नृसिंहो. ८।९
ॐ इति होव स्वरन्नेति	छां.उ.१।५।१,३
ॐ इतीदं सर्वम्	तैत्ति. १।८।१
ॐ इत्यक्षरम्	सन्ध्यो. २०
ॐ इत्यग्निहोत्रमनुजानाति	तैत्ति. १।८।१
ॐ इत्यग्रे व्याहरेत्	भ. जा. २।३
ॐ इत्यध्वर्युः प्रतिगरं प्रतिगृणाति	तैत्ति. १।८।१
ॐ इत्यनुजानीध्वं ब्रूतैनमिति	नृसिंहो. ९।१
ॐ इत्यनेनैव उपासीताजस्रं	मैत्रा. ६।४
ॐ इत्यनेनोद्धृत्यानामयेऽग्नौ जुहोति	मैत्रा. ६।२६
ॐ इत्यनेनोर्ध्वमुत्क्रान्तः	मैत्रा. ६।२२
ॐ इत्यभिनिधापयन्ति	शौनको. १।५
ॐ इत्यभ्यादद्ते	शौनको. १।५
ॐ इत्यस्यादद्ते	शौनको. १।५
ॐ इत्यात्मानं युञ्जीत	महाना.१७।१३
ॐ इत्याश्रावयति	छां. उ.१।१।५
ॐ इत्युद्गायति[छां.उ.१।१।१+१।१।९	+१।४।१
ॐ इत्येकाक्षरमन्तःप्रणवं विद्धि	ना. प. ८।२
ॐ इत्येकाक्षरं ब्रह्म [ध्या.बिं. ९+ ब्रह्मवि.२+महाना.११।५+सूर्यो.९ अमृ. २०+ तारसा. २।१	अ. ना. २१ +१प्रणवो+२ भ.गी.८।१३
ॐ इत्येकाक्षरमात्मस्वरूपं	तारसा. १।३
ॐ इत्येकाक्षरं परं ब्रह्म तदेवोपासितव्यं	तारसा. २।१
ॐ इत्येकाक्षरं ब्रह्म ध्येयं	ध्या. बिं.९
ॐ इत्येकेन (एतेन) रेचयेत्	अ. ना.२१
ॐ इत्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यं	अ.शिखो.१
ॐ इत्येतदक्षरमिदं सर्वं, तस्योपव्याख्यानं भूतं भव्यं भविष्यदिति नृ.पू.२।२+४।२+	माण्डू. १+ नृसिंहो. १।२

ॐ इत्येतदक्षरमुद्गीथमुपासीत	छां.उ.१।१।१ +१।४।१
ॐ इत्येतदक्षरमुद्गीथः	छां. उ.१।१।५
ॐ इत्येतदक्षरमुपासीत	छां. उ. १।४।१
ॐ इत्येतदक्षरस्य चैतत्	मैत्रा. ६।४
ॐ इत्येतदक्षरं परं ब्रह्म, अस्य पादाश्चत्वारः	अ. शिखो. १
ॐ इत्येतदक्षरं परं ब्रह्म तदेवोपासितव्यं	तारसा. २।१
ॐ इत्येतदनुकृति ह स्म वा अप्योश्रावय	तैत्ति. १।८।१
ॐ इत्येतदनुकृति ह स्म... आश्रावयन्ति (मा.)	तैत्ति. १।८।१
ॐ इत्येतद्व्याहरेत्	नारा. ३
ॐ इत्येतेन (एकेन) रेचयेत्	अ. ना. २१
ॐ इत्येव तदा हैषा एव समृद्धिः	छां. उ. १।१।८
ॐ इत्येव यदुद्भूतं ज्ञानं ज्ञेयात्मकं शिवम् । असंस्पृष्टविकल्पांशं प्राणस्पन्दो निरुध्यते	शाण्डि. १।३४
ॐ इत्येवं ध्यायथ आत्मानं, स्वस्ति वः	मुण्ड. २।२।६
ॐ इत्येवं ध्यायंस्तथाऽऽत्मानंयुञ्जीत	मैत्रा. ६।३
ॐ ईङ्कार वाक्प्रसादकर निर्मल चतुर्थेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ईशानाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः	विष्णुहृ.२।२६
ॐ ई ओं नमो भगवते श्रीमहागरुडाय ...	गारुडो. १०
ॐ ईसचरतिसचरति...वज्रेण स्वाहा	गारुडो. १२
ॐ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ	कठो. १।१
ॐ उङ्कार सर्वबलप्रद सारतर पञ्चमेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ उदानात्मने ॐतत्सद्भूर्भुवः सुवः	गोपालो.३।८
ॐ ऊङ्कारोच्चाटनकर दुस्सह षष्ठेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ऋङ्कार सङ्क्षोभकर चञ्चल सप्तमेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ॠङ्कार सम्मोहनकरोज्वलाष्टमेऽक्षे प्रतितिष्ठ	अ. मा. ४

ॐ भुवः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः विष्णुहृ. २।२
ॐ भुवः सन्न्यस्तं मया। ना.प.४।४६
ॐ भूर्नमो भगवते दावानल... लांगूलो. २
ॐ भूर्भुवः स्वः पुरुषाय पुरुषरूपाय वासुदेवाय... विष्णुहृ. २।४
ॐ भूर्भुवः स्वरिति व्याहृतयः २ प्रणवो. १८
ॐ भूर्भुवः स्वः, तत्सवितुर्वरेण्यं० सूर्यो. २
ॐ भूर्भुवः स्वः सन्न्यस्तं मया ना. प. ४।४६
ॐ भूर्लक्ष्मीर्भुवर्लक्ष्मीः स्वर्लक्ष्मीः कालकर्णी... नृ. पू. ४।३
ॐ भूः ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं [महाना.११।७+ त्रि.म.ना.७।११
ॐ भूः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः विष्णुहृ. २।१
ॐ भूः सन्न्यस्तं मया ना. प. ४६,४७
ॐ भूः स्वाहा ॐ भुवः स्वाहा... अनेन जातरूपधरो भूत्वा प. हं. प. ५
ॐ भूः स्वाहेति शिखामुत्पाट्य सं. सो. २।६
ॐ भूः स्वाहेत्यप्सु वस्त्रं कटिसूत्रं च विसृज्य [सं. सो. २।६+ ना. प. ४।४७
ॐ मङ्कार विद्वेषिमोहनकरैकचत्वारिंशेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ मत्स्यावताराय नमः ना. पू. ५।२
ॐ मधुसूदनाय पुरुषाय पुरुषरूपाय वासुदेवाय...नमः विष्णुहृ. २।१५
ॐ माधवाय पुरुषाय पुरुषरूपाय... नमो नमः विष्णुहृ. २।१२
ॐ यङ्कार सर्वव्यापक पावन द्विचत्वारिंशेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ यश्छन्दसामृषभो विश्वरूपः शांतिपाठः
ॐ यो ब्रह्माणं विदधाति पूर्वं शांतिपाठः
ॐ यो ह वै श्रीपरमात्मा...उकारवाच्य उपेन्द्रस्वरूपा... तारसा. ३।२
ॐ यो ह वै श्रीपरमात्मा...कलास्वरूपो लक्ष्मणो... तारसा. ३।६
ॐ यो ह वै श्रीपरमात्मा...नादस्वरूपो भरतो... तारसा. ३।५
ॐ यो ह वै...श्रीपरमात्मा नारायणः तारसा. ३।१
ॐ यो ह वै...नारायणः स भगवान्...भगवती सीता... तारसा. ३।७
ॐ यो ह वै श्रीपरमात्मा...बिन्दुस्वरूपः शत्रुघ्नो... तारसा. ३।४
ॐ यो ह वै श्रीपरमात्मा...मकारवाच्यः शिवस्वरूपो... तारसा. ३।३
ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवान्... तारसा. ३।१
ॐ यो ह वै श्रीपरमात्मा नारायणः स भगवान् तत्परः परमपुरुषः नित्यशुद्धबुद्ध...ब्रह्मैवाहं रामोऽस्मि भूर्भुवः... तारसा. ३।८
ॐ रङ्कार दाहकर विकृत त्रिचत्वारिंशेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ रामचन्द्राय नमः ॐम् त्रि.म. ना. ७।९
ॐ रामाय हुं फट् स्वाहा त्रि.म. ना.७।९
ॐ लङ्कार विश्वम्भर भासुर चतुश्चत्वारिंशेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ वङ्कार सर्वाप्यायनकर निर्मल पञ्चचत्वारिंशेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ वाङ्मे मनसि प्रतिष्ठिता शांतिपाठः
ॐ वामनाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः विष्णुहृ. १।१७ २३।३०
ॐ विष्णवे पुरुषाय पुरुषरूपाय... विष्णुहृ. २।१६
ॐ व्यानात्मने ॐ तत्सद्भूर्भुवः सुवः गोपालो. ३।६
ॐ शङ्कार सर्वफलप्रद पवित्र षट्चत्वारिंशेऽक्षे... अ. मा. ४
ॐ शिवं ॐ शिवं ॐ शिवं गणशो. २।१
ॐ शं नो मित्रः शं वरुणः शांतिपाठः
ॐ शीक्षां व्याख्यास्यामः तैत्ति. १।२।१
ॐ शोमिति शस्त्राणि शंसन्ति तैत्ति. १।८।१
ॐ श्रीकृष्णाय देवकीनन्दनाय ॐतत्सत् गोपालो. ३।९
ॐ श्रीकृष्णाय रामाय ओंतत्सद्भूर्भुवः गोपालो. ३।७
ॐ श्रीकृष्णायानिरुद्धाय ॐ तत्सत् गोपालो. ३।९
ॐ श्रीगोपालाय निजस्वरूपाय... गोपालो. ३।११
ॐ श्रीधराय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः विष्णुहृ. २।१८

ॐ श्रीमों नमो भगवते रघुनन्दनाय...रामाय...	त्रि.म.ना.७।११
ॐ श्री ह्रीं क्लीं नमो नारायणाय स्वाहा	ना. पू. ३।१
ॐ श्रीं ह्रीं नमो भगवते लक्ष्मीनारायणाय विष्णवे	ना. पू. ३।३
ॐ षङ्कार धर्मार्थ कामद धवल सप्तचत्वारिंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ सङ्कर्षणाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः	विष्णुहृ. २।६
ॐ सङ्कार सर्वकारण सार्ववर्णिकाष्टचत्वारिंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ सत्यमित्युपनिषत्	कालाग्नि. ५
ॐ सत्यं तदेतत्पण्डिताएव पश्यन्ति	नृसिंहो. ९।९
ॐ सद्योजाताय पुरुषाय पुरुषरूपाय वासु...नमो नमः	विष्णुहृ. २।२३
ॐ समानात्मने ॐतत्सद्भूर्भुवःसुवः	गोपालो. ३।१०
ॐ समुद्रं गच्छ स्वाहा	ना. प. ४।४७
ॐ सह नाववतु, सह नौ भुनक्तु...	शांतिपाठः
ॐ सुदर्शन महाचक्राय दीप्तरूपाय ...स्वाहा	त्रि.म.ना.७।१०
ॐ सुवः पुरुषाय पुरुषरूपाय वासुदेवाय	विष्णुहृ. २।३
ॐ सोऽहं सोऽहं सोऽहं	गणेशो. २।१
ॐ सुवः सन्न्यस्तं मया	ना. प. ४।४७
ॐ स्वाहेति शिखामुत्पाट्य	ना. प. ४।४६
ॐ हङ्कार सर्ववाङ्मय निर्मलैकोनपञ्चाशदक्षे प्रतितिष्ठ	अ. मा. ४
ॐ हंसः सोहम्	त्रि.म.ना.७।११
ॐ हि ॐहि ॐहीत्येतदुपनिषदं विन्यसेत्	आरुणि. ५
ॐ हृषीकेशाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो...	विष्णुहृ. २।१९
ॐ ळङ्कार सर्वशक्तिप्रद प्रधान पञ्चाशदक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ह्रीं कृष्णवाससे नारसिंहवदने...	वनदु. १६०
ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य
हुत्वा मन्थे सम्पातमवनयेत् छान्दो. ५।२।४
ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ
हुत्वा मध्ये स॰स्रवमवनयति बृह. ६।३।२
ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहम्.. अ. शिरः.१।१
ज्योग्जीवति महान्प्रजया पशुभिर्भवति छां. २।११।२
[+छान्दो. २।१२।२+—१७।२।१८
ज्योतिरन्नादम्, अप्सु ज्योतिः
प्रतिष्ठितम् तैत्ति. ३।८
ज्योतिरहं विरजा विपाप्मा भूयासम् लिङ्गोप. १
[म. ना. १४।७—१४।१९
ज्योतिरिति नक्षत्रेषु, प्रजातिरमृतं.. तैत्ति. ३।१०।३
ज्योतिर्ज्वलति ब्रह्माहमस्मि,योऽहमस्मि
ब्रह्माहमस्मि अहमस्मि ब्रह्मा.. महाना. ६।७
ज्योतिर्मयं तदन्तं स्यादवाच्यं बुद्धि-
सूक्ष्मतः। ददृशुर्ये महात्मानो
यस्तं वेद स वेदवित्। यो. चू. ८१
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं
ध्यायेत्सदा यतिः ब्र. वि. ८०
ज्योतिर्वा पारमात्मिकं सार्वे...
पराय ईशिषे स्वाहा पारमा. १।३
ज्योतिर्वाऽन्नं, वायुरन्नादः,वायुर्वाऽन्नं.. सुबालो. १४।१
ज्योतिर्विदं त्वासादयामि चित्त्यु. १९।१
ज्योतिश्च वायुश्चान्नादमेताभ्यां
हीदं सर्वमन्नमत्ति १ऐत. ३।१।२
ज्योतिषामपि तज्ज्योतिः
[यो.शि.३।२२+ भ. गी. १३।१८
ज्योतिषामा ज्योतिरानन्दयत्येव-
मेव तत्परं यच्चित्तं परमात्मान-
मानंदयति परब्र. २

ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः मुण्ड. २।२।९
ज्योतिषां ज्योतिरस्म्यहं, तमसः साक्ष्यहं.. ब्र.वि. ९५
ज्योतिषां रविरंशुमान् भ. गी. १०।२१
ज्योतिष्कामो ज्योतिरानन्दयते भूयस्तेनैव स्वप्नाय गच्छति ब्रह्मो. १
ज्योतिष्कृदसि सूर्य। विश्वमाभासि.. चित्त्यु. १६।१
[ऋ. अ. १।४।७=मं.१।५०।४+ अथर्व. १३।२।१९+२०।४७।१६+ वा.सं.३३।३६ तै. सं. १।४।३१।१
ज्योतिष्कृतं त्वासादयामि चित्त्यु. १९।१
ज्योतिष्पश्यन्ति उत्तरम् छांदो. ३।१७।७
[ऋ. अ. १।४।८ =मं. १।९०।१०
ज्योतिष्मतीं त्वासादयामि चित्त्यु. १९।१
ज्योतिष्मतो ह लोकाञ्जयति छांदो. ४।७।४
ज्योतिष्मंतस्त्रयः कालास्तिस्रो-ऽवस्थास्त्रय आत्मनः वासुदे. ४
ज्योतिष्मद्भ्राजमानं महस्वत्[+सुदर्श.५ त्रि.म.ना.७।३
[तै. आ. ३।१२।३।४
ज्योतिष्मानस्मिँल्लोके भवति छांदो. ४।७।४
ज्योतिष्यापः प्रतिष्ठिताः तैत्ति. ३।८
ज्योतिस्स्वरूपं लिङ्गं मामेवोपासितव्यं तदेवोपासितव्यम् भस्मजा. २।९
ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं तत्त्वं तत्परमस्ति.. शाण्डि.१।७।१६
ज्वलतामति (ज्वलना अपि) दूरेऽपि सरसा अपि नीरसाः। स्त्रियो हि नरकाग्नीनामिन्धनं चारु दारुणम् [महो. ३ । ४४+ याज्ञव. १३
ज्वलति स उद्गीथः, अङ्गारा भवन्ति स प्रतिहारः छान्दो.२।१२।१
ज्वलत्त्वात्सर्वतोमुखत्वान्नृसिंहत्वात् भीषणत्वाद्भद्रत्वात्..(नृसिंहः) नृसिंहो. ७ । ५
ज्वलनो ज्वालाभिः प्राणेन कोष्ठ-मध्यगतंजलमत्युष्णमकरोत् शाण्डि. १।४८
ज्वलन्तमग्निमुत्सृज्य नहि भस्मनि हूयते इतिहा. ४५
ज्वलन्तमज्वलन्तं सर्वतोमुखमसर्वतो-मुखं नृसिंहमनृसिंहं....आत्मानं ....जानीयात् नृसिंहो. ६ ।१
ज्वलन्तमित्याह–ज्वलन्निव खल्वसाववस्थितः अव्यक्तो. ३
ज्वलन्तं न प्रदीपं च स्वयं निर्वापयेद्बुधः शिवो. ७।७१
ज्वलतः पावकाद्यद्वत्.. स्फुलिङ्गाः कोटिकोटिशः।..विश्वं तस्यास्तथा गुह्यका. २८
ज्वलन्तीं त्वासादयामि चित्त्यु. १९। १
ज्वलतोऽपि यथा बिन्दुः सम्प्राप्तश्च हुताशनम्। व्रजत्यूर्ध्वं गतः शक्त्या निरुद्धो योगमुद्रया यो. चू. ५९
बृह.१।५।२२..
ज्वलिष्याम्येवाहमित्यग्निर्दध्रे
ज्वालाजालपरिस्पन्दो दग्धेन्धन इवानलः। उदितोऽस्तंगतइव ह्यस्तंगत इवोदितः अ. पू.३।११
ज्वालामालाकुलं भाति विश्वस्यायतनं महत्।... तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम् महाना. ९। २७
ज्वालाया दर्शने मृत्युर्द्विदिने भवति ध्रुवम् (आयुश्चिह्नम्) त्रि. ब्रा. १२७
ज्वालावह्निः शीतलश्चेदस्तिरूप-मिदं जगत् ते. बिं. ६।८४
ज्वालाग्निमण्डले पद्मवृद्धिश्चेज्जग-दस्तित्वदम् ते. बिं. ६।८४

ज्ञ

ज्ञपयते स प्रस्तावः छान्दो.२।१३।१
ज्ञप्तिर्हि ग्रन्थिविच्छेदस्तस्मिन् सति विमुक्तता महो. ५।४०
ज्ञमनो नाशमभ्येति मनो ज्ञस्य हि शृङ्खला मुक्तिको.२।३९
ज्ञविज्ञसम्यग्ज्ञालम्बंनिरालम्बंहरिंभजे निरा. शीर्षकं
ज्ञः कालकालो गुणी सर्वविद्यः। तेनेशितं कर्म विवर्ततेह श्वेता. ६।२
ज्ञः सर्वगो भुवनस्यास्य गोप्ता। यईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय श्वेता. ६।१७

ज्ञाज्ञौद्वावजावीशानीशावजाह्येका भोक्तृभोगार्थयुक्ता । अनंतश्चात्माविश्वरूपोह्यकर्तात्रयं यदा विन्दते ब्रह्ममेतत् [तेनेदंसृष्टं ब्रह्मचक्रंहिसर्वम् ।][श्वेता.१।९।ना.प९।८ भवसं.२।३

ज्ञातचरदेशं चण्डालवाटिकामिव स्त्रियमहिमिव (त्यजेत्) ना.प. ७।१

ज्ञातज्ञेयास्त उच्यन्ते जीवन्मुक्ता महाधियः । पदार्थभावनादार्ढ्यं बन्ध इत्यभिधीयते महो. २।४०

ज्ञातव्यमवशिष्यते भ.गी. ७।२

ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् । असौ दोषैर्विनिर्मुक्तः.. यो.शि. १। १५

ज्ञातं येन निजं रूपं कैवल्यं परमं पदं निष्कलं निर्मलं शान्तं.. एतज्ज्ञानमिति प्रोक्तम् १यो.त.१७,१८

ज्ञाता चिन्मात्ररूपश्च सर्वचिन्मयमेव हि । संभाषणं च चिन्मात्रं.. ते.बिं. २।२९

ज्ञातानुज्ञात्रननुज्ञातृविकल्पज्ञानसाधनम् । विकल्पत्रयमत्रापि.. मायामात्रं विदित्वैवं.. ना.प. ८।२०

ज्ञाता होता ज्ञानमग्निः,ज्ञेयं हविः भावनो. ३

ज्ञातुं द्रष्टुं च तत्त्वेन भ.गी. ११।५४

ज्ञातृज्ञानज्ञेयानामभेदभावनं श्रीचक्रपूजनम् भावनो. २

ज्ञातृज्ञानज्ञेयानामाविर्भावतिरोभावज्ञाता स्वयमाविर्भावतिरोभावरहितः स्वयञ्ज्योतिः साक्षीत्युच्यते सर्वसारो. ५

ज्ञातृत्वं समानयोगेन श्रोत्रद्वारा शब्दगुणो वागधिष्ठित आकाशे तिष्ठति.... त्रि.ब्रा. १।६

ज्ञाते द्वैतं न विद्यते आगम. १८

ज्ञातोऽज्ञातश्चेति होचुर्न चैनमिति होचुः नृसिंहो. ९।१०

ज्ञातोनैषविज्ञातोविदिताविदितात्परः नृसिंहो. ९।८

ज्ञात्वा (नारायणं) जीवन्मुक्तो भवति ना.पू.ता. १।१

ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान् महाना.१७।१४

ज्ञात्वा (शिवमात्मानं) तं मृत्युमत्येति, नान्यः पन्था विमुक्तये कैव. ९

ज्ञात्वा तां (देवीं) मृत्युपाशाञ्छिनत्ति गुह्यका. ५८

ज्ञात्वा त्रिविधमात्मानं परमात्मानमाश्रयेत् । रुद्रहृ.१२

ज्ञात्वादेवं मुच्यते सर्वपाशैः [श्वेता. १।८+२।१५+ [४।१६+५।१३+६।१३ ना.प. ९।७।१०

ज्ञात्वा देवं सर्वपाशापहानिः श्वेता. १।११

ज्ञात्वा भूतादिमव्ययम् भ. गी. ९।१३

ज्ञात्वा मां शांतिमृच्छति भ. गी. ५।२९

ज्ञात्वा (मृत्युं) यतेत कैवल्यप्राप्तये त्रि.ब्रा.२।१२२

ज्ञात्वा शास्त्रविधानोक्तं भ. गी.१६।२४

ज्ञात्वा शिवं शान्तिमत्यन्तमेति श्वेताश्व. ४।१४

ज्ञात्वा शिवं सर्वभूतेषु गूढं विश्वस्यैकं परिवेष्टितारं ज्ञात्वादेवं मुच्यते सर्वपाशैः श्वेता. ४ । १६

ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् । सोऽहमित्येव तद्वृत्या स्वान्यत्रात्ममतिं त्यजेत् अध्यात्मो. २

ज्ञात्वैवं (ब्रह्मैवाहं) मनोदण्डं धृत्वा आशानिवृत्तो भूत्वा भ्रमरकीटन्यायेन मुक्तो भवति ना. प. ५२

ज्ञानकर्मेन्द्रियैर्ज्ञानविषयैःप्राणादिपञ्चवायुमनोबुद्धिभिश्च स्थूलकल्पितैः सोऽपि स्थूलप्रकृतिरित्युच्यते यो. चू. ७२

ज्ञानतोऽज्ञानतो वापि पठतां बन्धमोचकम् ।..इदमष्टोत्तरशतं न देयं यस्यकस्यचित् मुक्तिको.१।४६

ज्ञानदण्डा ज्ञानशिखा ज्ञानयज्ञोपवीतिनः । शिखा ज्ञानमयीयस्य.. शाट्याय. १६

ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते [ना.प. ५।१३+ प. हं. ५

ज्ञानदीपेन भास्वता भ. गी.१०।११

ज्ञाननिर्धूतकल्मषाः भ. गी. ५।१७

ज्ञाननिष्ठो विरक्तोऽपि धर्मज्ञो विजितेन्द्रियः । विना देहेन योगेन न मोक्षं लभते.. यो.शि.१।२४

ज्ञाननेत्रं समाधायसमहत्परमं पदम् । ..शान्तं ब्रह्माहमिति संस्मरेत् त्रि.ता. ५।२०

ज्ञाननेत्रं समादाय चरेद्वह्निमतः परम्। निष्कलं निर्मलं शान्तं तद्ब्रह्माहमिति स्मृतम् ब्र. बिं. २१

ज्ञानपूतं त्रिगुणस्वरूपं त्रिमूर्तित्वं पृथग्विज्ञाय मूलमेकं सत्यं मृण्मयं विज्ञातं स्यात्.. परब्र. ४

ज्ञानप्रबोधो यस्मिन् समये माया-मोहं सशब्दातीतोऽपिजायते अद्वैतो. २

ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः (ततस्तु मां पश्यते निष्कलं च) [मुण्ड. ३।१।८+ गुह्यका. ३७

ज्ञानबलैश्वर्यशक्तितेजस्स्वरूपो भवति (नारायणः) त्रि.म.ना. २।६

ज्ञानमावृत्य देहिनम् भ. गी. ३।४

ज्ञानभूमिः शुभेच्छाख्या प्रथमा... महो. ५।२४

ज्ञानभूमिः शुभेच्छा स्यात् ... सप्तमी तुर्यगा स्मृता वराहो. ४।१,२

ज्ञानमेव परं तेषां पवित्रं ज्ञान-मुच्यते (ईरितं) [ब्रह्मो.११+ परब्र. ६।१३

ज्ञानयज्ञः परन्तप भ. गी. ४।३३

ज्ञानयज्ञः स विज्ञेयः सर्वयज्ञोत्तमो-त्तमः (पूर्वोक्तः) शाट्याय. १६

ज्ञानयज्ञेन चाप्यन्ये भ. गी. ९।१५

ज्ञानयज्ञेन तेनाहं भ.गी. १८।७०

ज्ञानयुक्तयमाद्यष्टाङ्ग..योग उच्यते मं. ब्रा. १।१

ज्ञानयोगनिधिं विश्वगुरुं योगिजन-प्रियम्। भक्तानुकंपिनं सर्व-साक्षिणं..एवं यः सततं ध्यायेद्देव-देवं..स मुक्तः शांडि. ३।४

ज्ञानयोगपराणां तु पादप्रक्षालितं जलम् । भावशुद्ध्यर्थमज्ञानां तत्तीर्थं मुनिपुङ्गव जा. द. ४।५६

ज्ञानयोगविनिर्मुक्तः कर्मयोगसमा-वृतः। मृतः शिवपुरं गच्छेत्सः.. शिवो. १।२९

ज्ञानयोगव्यवस्थितिः भ.गी. १६।१

ज्ञानयोगं न विन्दंति ये नरा मन्दबुद्धयः। ते मुच्यन्ते कथं.. शिवो. १।३

ज्ञानयोगः कर्मयोग इति योगो द्विधा मतः त्रि. ब्रा. २।२३

ज्ञानयोगः स विज्ञेयः सर्व-सिद्धिकरः शिवः त्रि. ब्रा. २।२६

ज्ञानयोगेनमुच्यन्ते देहपातादनन्तरम् भोगान् भुक्त्वा च मुच्यन्ते.. शिवो. १।३१

ज्ञानयोगेन साङ्ख्यानां भ. गी. ३।३

ज्ञानरूपमानन्दमयमासीत् (पुरेदं ब्रह्मांडं) अव्यक्तो. १

ज्ञानवान् मां प्रपद्यते भ.गी. ७।१९

ज्ञानविज्ञानतृप्तात्मा भ. गी. ६।८

ज्ञानविज्ञाननाशनम् भ. गी. ३।४१

ज्ञानवैराग्यमृत्तोयैः क्षालनाच्छौच-मुच्यते मैत्रे. २।९

ज्ञानवैराग्ययुक्तो वित्तस्त्रीपराङ्मुखः.. शरीररक्षणार्थं.. भैक्षमाणो ब्रह्मभूयाय भवति प. हं. प. ६

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्य-शेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः भवसं. २।५२

ज्ञानशक्तिश्चेतनाशक्तिः क्षेत्रशक्ति-रिच्छान्तर्भूत्वा माया सत्त्व-रजस्तमोमयी शाक्तिको. ९

ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयज्ञोप-वीतिनः। ज्ञानमेव परंतेषां पवित्रं ज्ञानमीरितम्(उच्यते)[ब्रह्मोप.११ +परब्र.१३ [+ना. प. ३।८३

ज्ञानशौचं परित्यज्य बाह्ये यो रमते नरः।..लोष्ठं गृह्णाति सुव्रत जा. द. १।२२

ज्ञानसङ्कल्पनिश्चयानुसन्धानाभिमाना आकाशकार्यान्तःकरणविषयाः त्रि. ब्रा. १।४

ज्ञानसङ्गेन चानघ भ. गी. १४।६

ज्ञानसञ्छिन्नसंशयम् भ. गी. ४।४१

ज्ञानसंहारसंयुक्तंशक्तिद्वयसमन्वितम् पञ्चब्र. ७

ज्ञानस्वरूपमेवादौ ज्ञानं ज्ञेयैक-साधनम्। ज्ञातंयेननिजंरूपंकैवल्यं.. १यो. त. १६

ज्ञानस्वरूपमेवादौ ज्ञेयं ज्ञानैक-साधनम् । अज्ञानं कीदृशं चेति प्रविचार्य.. यो. शि. १।१४

ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी। यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता देव्यु. २१
ज्ञानानां ज्ञानमुत्तमम् भ. गी. १४।१
ज्ञानान्मुक्तिमवाप्नुयात् शिवो. ७।७४
ज्ञानामृततृप्तयोगिनो न किञ्चित् कर्तव्यमस्ति, तदस्ति चेन्न स तत्त्वविद्भवति पैङ्गलो. ४।९
ज्ञानामृतरसो येन सकृदास्वादितो भवेत्। स सर्वकार्यमुत्सृज्य तत्रैव परिधावति जा. द. ६।४८
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। न चास्ति किञ्चित्कर्तव्यं.. जा. द. १।२३
ज्ञानावस्थितचेतसः भ. गी. ४।२३
ज्ञानिनस्तत्त्वदर्शिनः भ. गी. ४।३४
ज्ञानिनामूर्ध्वगो भूयादज्ञाने स्यादधोमुखः। एवं वै प्रणवस्तिष्ठेत् यो. चू. ७८
ज्ञानिनां ज्ञानदा सत्यं दानवानां विनाशिनी (महालक्ष्मीः) ना. पू.ता.२।३
ज्ञानिनो नित्यवैरिणा भ. गी. ३।३९
ज्ञानिनो हृदयं मूढैर्ज्ञातं चेत् कल्पनं तदा। श्वानेन सागरे पीते निःशेषेण जगद्भवेत् ते. बिं. ६।९६
ज्ञानिभ्योऽपि मतोऽधिकः भ. गी. ६।४६
ज्ञानी च भरतर्षभ भ. गी. ७।१६
ज्ञानी त्वात्मैव मे मतम् भ. गी. ७।१०
ज्ञाने च त्रिविधे ज्ञेये क्रमेण विदिते स्वयम्। सर्वज्ञता हि सर्वत्र भवतीह महाधियः अ. शां. ८९
ज्ञानेन ज्ञेयमालोक्य पश्चाज्ज्ञानं परित्यजेत् ब्र. वि. ३६
ज्ञानेन तु तदज्ञानं भ. गी. ५।१६
ज्ञानेन विज्ञाने ज्ञेये परमात्मनि हृदि संस्थिते देहे लब्धाशान्तिपदं गते तदा प्रभामनोबुद्धिशून्यं भवति पैङ्गलो. ४।९
ज्ञानेनाकाशकल्पेन धर्मान्योगगनोपमान्। ज्ञेयाभिन्नेन सम्बुद्धस्तं वन्दे द्विपदां वरम् अ.शां. १
ज्ञानेनाज्ञानकार्यस्य स मूलस्यलयो यदि। तिष्ठत्ययं कथं देह इति शङ्कावतोजडान्। समाधातुंबाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः अध्यात्मो. ५९
ज्ञानेनैव विना योगो न सिद्ध्यति कदाचन। जन्मान्तरैश्च बहुभिर्योगो ज्ञानेन लभ्यते यो.शि. १।५२
ज्ञानेनैव हि संसारविनाशो नैव कर्मणा रुद्रह. ३५
ज्ञानेन्द्रियकर्मेन्द्रियान्तःकरणचतुष्टयं चतुर्दशकरणयुक्तं जाग्रत् शारीरको. १०
(अथ)ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकं वियदादिपञ्चकमन्तःकरणचतुष्टयं कामकर्मतमांस्यष्टपुरम् पैङ्गलो. २।६
ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्लोचनादयः वराहो. १।२
ज्ञानेन्द्रियैःसहबुद्धिर्विज्ञानमयकोशः पैङ्गलो. २।५
ज्ञानेन्द्रियैःसह मनो मनोमयकोशः पैङ्गलो. २।५
ज्ञाने परिसमाप्यते भ.गी. ४।३३
ज्ञानैर्बिभर्ति ज्ञायमानं च पश्येत् श्वेता. ५।२
ज्ञानोदयात्पुरारब्धं कर्मज्ञानान्न नश्यति। अदत्वास्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् अध्यात्मो. ५३
ज्ञेयं वस्तुपरित्यागाद्विलयं याति मानसम्। मानसे विलयं याते कैवल्यमवशिष्यते शांडि.१।७।२३
ज्ञेयं चाज्ञेयं च विकल्पासहिष्णु तत्सशक्तिकं गजवक्त्रं गजाकारं जगदेवावरुन्धे ग.शो. ३।३
ज्ञेयं चोक्तं समासतः भ.गी. १३।१९
ज्ञेयं यत्तत्प्रवक्ष्यामि भ.गी. १३।१३
ज्ञेयं सर्वप्रतीतं च तज्ज्ञानं मन उच्यते। ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः शांडि. १।७।२२

ज्ञेयः स नित्यसन्यासी भ.गी. ५।३

ज्ञेयोऽसि नियतात्मभिः भ.गी. ८।२

ज्ञोऽमृतोहुतसंवित्कः शुद्धः संविष्टो निर्विघ्न इममसुनियमेऽनुभूय इहेदं सर्वं दृष्ट्वा.. स प्रपञ्चहीनः.. नृसिंहो. ३।३

झ

झषाणां मकरश्चास्मि भ.गी. १०।३१

ण

णकारो भगवान् भवति (नारायणः) ता.रसा. १।४

त

त इमेऽवस्थिता युद्धे भ.गी. १।३३

त इमे सत्याः कामा अनृतापिधानाः छान्दो. ८।३।१

त इह व्याघ्रो वा सिंहो वा वृको वा वराहो कीटो वा..यद्यद्भवन्ति तदा भवन्ति [छान्दो. ६।९।३ +६।१०।२

त इह व्रीहियवा ओषधिवनस्पतय-स्तिलमाषा इति जायन्ते छान्दो.५।१०।६

त ऋषयोऽभवंस्तदृषीणामृषित्वम् सद्वै. १३

त ऋषीनब्रुवन्–नमोवोऽस्तु भगवतो-ऽस्मिन्धामनिकेनत्वःसमर्थयामीति सद्वै. ११

त एतस्यैव सर्वे रूपमभवन् बृह. १।५।२१

त एतदेवरूपमभिसंविशन्त्येतस्माद्रूपा-दुद्यन्ति [छान्दो.३।६।२+७।२+८।२ +९।२+१०।२

त एवं ब्रह्मयज्ञमपश्यंतमाहरन् सद्वै. १३

त एतानि सूक्तान्यपश्यन् यद्देवा देवहेळनं यद्दीव्यं.. सद्वै. ११

त एतावन्तो भवन्ति (पशवः) यथाप्रज्ञं हि संभवाः १ऐत. ३।२।४

त एते सर्व एव समाः सर्वेऽनन्ताः स यो हैतानन्तवत उपास्ते-ऽनन्तं लोकं जयति बृह.१।५।१३

त एनं तृप्ता आयुषा तेजसा वचसा श्रिया..ब्रह्मवर्चसेनान्नाद्येन चतर्पयन्ति सद्वै. १४

त एव पुनरावर्तन्ते तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यंते प्रश्नो. १।९

त एव भूमतां प्राप्ताः संशान्ताशेष-किल्बिषाः..येयाता विमनस्कताम् महो. ५।६०

त एवमेवानुपरिवर्तन्ते बृह. ६।२।१६

त एवैनमुपमन्त्रयते ददाम त इति कौ.उ. २।१,२

त एषु लोकेष्वस्पर्धन्त बृ. उ. १।३।१

त ऐक्षन्त हन्तैनमासुरं पाप्मानं ग्रसाम इति नृसिंहो. ६।१

त ऐक्षन्तास्माकमेवायं विजयो-ऽस्माकमेवायं महिमेति केनो. ३।१

तकारस्तारलक्ष्म्या च वैराजः प्रस्तरः स्मृतः। इकाररूपिणी...महा-माया... अव्यक्तस्वरूपा भवतीति सीतेत्युदाहरन्ति सीतो. २,३

तक्रं क्षीरस्वरूपं चेत्कचिन्नित्यं जगद्भवेत् ते.बिं. ६।८०

तक्ष्णुवन्ति वासीभिः कृण्वति फली-भिर्न हैव शक्नुवत इति आर्षे. १२

तच्च कारणमेकं हि न भिन्नं नोभया-त्मकम्। भेदः सर्वत्र मिथ्यैव धर्मादेरनिरूपणात्। पञ्चब्र. ३२

तच्चक्रमध्ये पापपुण्यप्रचोदितो जीवो भ्रमति शांडि. १।४।४

तच्चक्षुषाऽजिघृक्षत्, तन्नाशक्नो-च्चक्षुषा ग्रहीतुम् २ ऐत. ३।५

तच्च न मुख्योऽस्ति, कोऽयं मुख्य इति च हृदयं मुख्यः.. प.हं.प. २

तच्च निरतिशयानन्दाखण्डब्रह्मा-नन्दनिजमूर्त्याकारेण ज्वलति त्रि.म.ना. १।४

तच्च संस्मृत्य संस्मृत्य भ.गी. १८।७७

तच्चानन्दसमुद्रमग्ना योगिनो भवन्ति, तदपेक्षया इन्द्रादयःस्वल्पानन्दाः मं.ब्रा. २।९

तच्चानिर्वाच्यमनिर्देश्यमखण्डान-न्दैकरसात्मकं भवति त्रि.म. ना. १।४

तच्चालौकिकपरमानन्दलक्षणा-खण्डामिततेजोराशिर्ज्वलति त्रि.म.ना. १।४

तच्चित्स्वरूपं निर्विकारमद्वैतं च ग.शो. ४।२

तच्चेजिज्ञास्यसि मावग-च्छेति (ब्रह्मतेजः) अव्यक्तो. २

तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वा-स्तं चान्तर्यामिणं.. बृह. ३।७।१

तच्छब्दवर्ज्यस्त्वंशब्दहीनो वाक्यार्थवर्जितः। क्षराक्षरविहीनो यो नादान्तज्योतिरेव सः — ते.बि. ५।६

तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः [सहवै. २५+ [ऋ. खि. १०।१९१।५ — चित्यु. शां.

तच्छान्तमशब्दमभयमशोकमानन्दं विष्णुसंज्ञितं सर्वापरं धामेति — मैत्रा. ७।३

*तच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं मतम्। तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् — मुक्तिको. २।१

तच्छिश्नेनाजिघृक्षत्, तन्नाशक्नोत्.. — २ ऐत. ३।९

तच्छुद्धमप्राप्यं प्राप्यंच ज्ञेयंचाज्ञेयं च — ग.शो. ३।३

तच्छुद्धं तच्छबलम्, ततः प्रकृतिमहत्तत्त्वानि जायन्ते — ग.शो. २।५

तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः — मुण्ड. २।२।९

तच्छियो(तच्छिरो)ऽश्रयत, यच्छिरोऽभवत् — १ऐत. १।४।२

तच्छ्रीरित्युपासीत, तद्यश इत्युपासीत — कौ. उ. २।६

तच्छ्रेयो रूपमत्यसृजत — बृह. १।४।११

तच्छ्रोत्रेणाजिघृक्षत्। तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम् — २ऐत. ३।६

तज्जपाल्लभते पुण्यं नरोरुद्राक्षधारणात् — रु. जा. ६

तज्जापकानां वाक्सिद्धिःश्रीसिद्धिः... — हयग्री. ६

तज्जः कर्मफलेनान्तस्तथा नायाति रञ्जनम् — अ. पू. ५।९८

तज्ज्ञानप्रवाहाधिरूढेन ज्ञेयम् — मं. ब्रा. २।१

तज्ज्ञानं विद्धि राजसम् — भ. गी.१८।२०

तज्ज्ञानं विद्धि सात्त्विकम्। — भ. गी.१८।२१

तज्ज्ञानेन संसारनिवृत्तिः — मं. ब्रा. १।४

तज्ज्ञानेन हि विजानीहि, य एको देव आत्मशक्तिप्रधानः सर्वज्ञः सर्वेश्वरो भूतान्तरात्मा.. — शाण्डि. २।४

(उत) तटस्थो द्रष्टा तटस्थो न द्रष्टा द्रष्टृत्वान्न द्रष्टैव — ना. प. ६।६

*'उच्छास्त्रं' इति पाठान्तरं, तदेव साध्विति भाति, तृतीयचरणे तथैवोक्तत्वात्, उकारवाक्येषु तथोल्लेखाच्च। [पृ.९४पं.३०]

तडित्सु शरदभ्रेषु गन्धर्वनगरेषु च। स्थैर्यं येन विनिर्णीतं स विश्वसतु विग्रहे — महो. ३।३२

तण्डुलस्य यथा चर्म यथा ताम्रस्य कालिमा। नश्यति क्रियया विप्र पुरुषस्य तथा मलम्। — महो. ५।१८५

तत्र उपनिषदः श्रुतय आविर्बभूवुः — गोपीचं. २७

तत उपरि पूर्णचन्द्रमण्डलम् — मं. ब्रा. २।३

तत उपस्थगुदयोर्न्येतन्मूत्रपुरीषं कस्मादाहारापानसिक्तत्वादनुपचति — निरुक्तो. २।१

तत उ ह बालाकिः समित्पाणिः प्रतिचक्रमे उपायानीति — कौ. उ.४।१८

तत उ हैनं यष्ट्या विचिक्षेप स तत एव समुत्तस्थौ — कौ. उ. ४।१८

(अथ) तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता — छांदो.३।११।१

तत एकशफमजायत — बृह.१।४।४

(उद्धैव) तत एत्यगदो हैव भवति — छांदो. ३।१६।६

तत एव उदेत्य नैवोदेता (मा. पा.) — छां.उ.३।११।१

तत एव च विस्तारं — भ. गी १३।३१

तत एव पवमानपावकशुचय आविष्कृतमेतेनास्य यज्ञम् — मैत्रा. ६।३४

तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः. — छान्दो.६।१६।२

तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति — छांदो. ६।१६।१

तत एवास्य भयं वीयाय, कस्माद्ध्येष्यत् — बृह. १।४।२

तत ओङ्कारमपश्यत्ततो व्याहृतीस्ततो गायत्री, गायत्र्या वेदास्तैरिदमसृजत् — गोपीचं. २७

तत ओषधयोऽन्नं च ततः पिण्डाश्चतुर्विधाः — त्रि. ब्रा. २।५

तत एतन्नामधेयं लेभे (वसिष्ठ इति) — १ऐत. २।४।१

ततश्चतुर्जालं ब्रह्मकोशं प्रणुनेत्.. — मैत्रा. ६।२८

ततश्चतुर्जालं ब्रह्मकोशं भिन्दद्ततः परमाकाशम् — मैत्रा. ६।३८

ततश्च दशमे मासि प्रजायते। जातश्च वायुना स्पृष्टो न स्मरति जन्ममरणम् (गर्भः) निरुक्तो. १।८

ततश्च महद्दाया ब्रह्मणो महामाया-सम्मीलनात् पञ्चभूतेषु गन्धवती पृथिव्यासीत् गोपीचं. ८

ततश्चन्द्रः प्रजापतिशक्रौ,ततो माया (भवति) कामराज. १

ततश्च हृद्देशे महान्तं पुरुषं गजवक्त्रं ..श्रीहृत्कं..दृष्ट्वा स्तुवन्तिस्म ग. शो. ४।७

ततश्चाग्रे कोटिसूर्यप्रकाशमानन्दरूपं गजवक्त्रं विलोकयति ग. शो. ३।६

ततश्चात्मानमिति मन्यते स्म । न चैवमतः परं किञ्चित् ग. शो. ३।६

ततश्चाधःप्रदेशे दश दिक्षु भ्रमन्तो न कश्चित् पश्यन्ति स्म ग. शो. ४।६

ततश्चाप्रमादेन निवसेत्... काश्यां लिङ्गरूपिण्याम् भस्मजा. २।१६

ततश्चाहङ्कारादिपञ्चतन्मात्राजायन्ते ग. शो. २।५

ततश्चाहतं वासः परिधत्ते पाप्मनोपहत्यै भस्मजा. २।२

ततश्चैकादशाहेन लयस्थस्य लयोदयात् । मनसा सहितः सोऽपि गंतुमिच्छति दूरतः अमन. १।६१

ततश्चोमिति ध्वनिरभूत्स गजाकारः ग. शो. ४।६

ततस्ततो नियम्यैतत् भ.गी. ६।२६

ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः...प्रत्याहारः स विज्ञेयः.. ते.बिं. १।३२

ततस्तस्मान्निर्विशेषमतिनिर्मलंभवति त्रि.म.ना. ४।१

ततस्तादृग्गुणगतं मनो भावयति क्षणात्। गन्धतन्मात्रमेतस्मात्.. महो. ५।१५१

ततस्तु तं पश्यते निष्कलं ध्यायमानः (आत्मानं) मुण्ड. ३।१।८

ततस्तुतांपश्यतिनिष्कलांच (ज्ञानेन) गुह्यका. ३७

ततस्तु सम्बभूवासौ यद्गिरामप्यगोचरः। यच्छून्यवादिनां शून्यं.. अ.पू. ३।१९

ततस्तेजोहिरण्मयमण्डलम्। तत्र ब्रह्मा चतुर्मुखोऽजायत महो. १।४

ततस्तेमुक्तामामनुविशन्ति विज्ञानमयेनाङ्गेन, न पुनरावर्तन्ते भस्मजा. २।१५

ततस्त्रयोदशाहेनलयेनापि.. सिद्धिं लभते चिन्तनादपि अमन. १।६३

ततःकनीयसाएवदेवाज्यायसाअसुराः बृह. १।३।१

ततःकराग्रेणाहङ्कारंसृष्टवान् (गणेशः) ग.शो. ४।३

ततःकण्ठान्तरे योगी समूहन्नाडिसञ्चयम् क्षुरिको. १५

ततःकालवशादेव ह्यात्मज्ञानविवेकतः । योगाभ्यासं स्थितश्चरन्... त्रि.ब्रा. २।१८

ततः कालवशादेव प्रारब्धेतु क्षयंगते । ब्रह्मप्रणवसन्धानंनादोज्योतिर्मयः शिवः । स्वयमाविर्भवेदात्मा.. ना.बिं. २९

ततः कालवशादेवप्रारब्धेतुक्षयंगते । वैदेहीं मामकीं मुक्तिं यान्ति... मुक्तिको. १।४

ततः कुरु यतात्मवान् भ.गी. १२।११

ततः कूर्चं व्योम षष्ठस्वरबिन्दुमेलनरूपम् तारोप. ३

ततः कृशवपुःप्रसन्नवदनो..निर्मुक्तरोगजालो जितबिन्दुः पट्वग्निर्भवति शांडि.१।७।१४

ततः क्षत्रं बलमोजश्च जातम् चित्यु. ११।९

ततः पक्वकषायेण नूनंविज्ञातवस्तुना । शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निराधिना मुक्तिको.२।३१

ततः पतिश्च पत्नी चाभवता तस्मादिदमर्धबृगलमिव.. बृह. १।४।३

ततः पदं तत्परिमार्गितव्यम् भ.गी. १५।४

ततः पद्मासनं बद्ध्वा समग्रीवोदरः सुधीः ।...प्राणं घ्राणेन रेचयेत् यो. कुं. १।३२

ततः परतरं शुद्धं व्यापकं निर्मलं शिवम् । सदोदितं परं ब्रह्म.. ना.बिं. १७

ततः परमेष्ठी व्यजायत,सोऽभिजिज्ञासत किंमेकुलं किंमेकृत्यमिति अव्यक्तो. १

ततः परं ब्रह्म परं बृहन्तं यथा निकायं सर्वभूतेषु गूढम् । ..ईशं तं ज्ञात्वाऽमृता भवन्ति श्वेता. ३।७

ततः परिचयावस्था जायते-
ऽभ्यासयोगतः १यो. त. ८१
ततः पवित्रं परमेश्वराख्यमद्वैत-
रूपं... (आत्मरूपं दृश्यते) पैङ्गलो. ४।११
ततः पीयूषमिव विषं जीर्यते शांडि.१।७।४३
ततः पुण्यवशात्सिद्धो गुरुणा
सहसङ्गतः।..सत्वरं फलमश्नुते यो.शि.१।१४२
ततः पूर्वापरे व्योम्नि...नारायण-
मनुध्यायेत्स्रवन्तममृतं सदा यो.शि. ५।४३
ततः पृथ्व्यप्तेजोवाय्वाकाशानि
पञ्चमहद्भूतानि जायन्ते ग. शो. २।५
ततः प्रकाशते परं ब्रह्म मेघापायें-
ऽशुमानिव कलिसं.
ततः प्रकृतिमहत्तत्त्वानि जायन्ते ग.शो.२।५
ततः प्रक्षाल्य (हस्तौ) तद्भस्मापः
पुनन्त्विति पिबेत् भस्मजा. १।५
ततः प्रजाः प्रजायन्ते य एवं वेद..
प्रत्यग्ज्योतिष्यात्मन्येव रन्ताऽरम् अव्यक्तो. ७
ततः प्रणतोमायानुकूलेनहृदामस्यमष्टा-
दशार्णस्वरूपं सृष्टये दत्त्वाऽन्तर्हितः गो. पू. ३।८
ततः प्रद्युम्नसंज्ञं मन आसीत्। तस्मा-
दहङ्कारनामाऽनिरुद्धः सङ्कर्षणो. १
ततः प्रवर्तते वाणी स्वेच्छया ललिता-
क्षरा। गद्यपद्यात्मकैः शब्दैः... सरस्व. ३३
ततः प्रवेशयामास जनकः शुकमङ्गणे।
तत्राहानि सप्तैव तथैवावसदुन्मनाः महो. २।२३
ततःप्रवेशयामासजनकोऽन्तःपुराजिरे।
राजा न दृश्यते तावत्.. महो. २।२४
ततः प्रव्रज्य शुद्धात्मा सञ्चरेद्यत्रकुत्र-
चित्।..सम्पश्यन्हि जनार्दनम् ना.प. ५।४८
ततः प्रव्रज्याख्यं धृतिदण्डं धनु-
र्गृहीत्वाऽनभिमानमयेन चैवेषुणा.. मैत्रा. ६।२८
ततः प्राणमयो ह्यात्मा विभिन्न-
श्चान्तरः स्थितः। ततो विज्ञान
आत्मा तु..आनन्दमय आत्मा
तु ततोऽन्यः कठरु. २१
ततः प्राणोऽजायत स इन्द्रः बृह. १।५।१२
ततः शङ्खाश्च भेर्यश्च भ. गी. १।१३
ततःशरीरेलघुदीप्तिवह्निवृद्धिनादाभि-
व्यक्तिर्भवति शांडि. १।५।२

ततः शुद्धश्चिदेवाहं व्योमवान्निरु-
पाधिकः। जीवेश्वरादिरूपेण.. वराहो. २।५३
ततः शुद्धःसत्त्वान्तरस्थमचलममृत-
मच्युतं ध्रुवं विष्णुसंज्ञितं
स्वमहिम्नि तिष्ठमानं पश्यति मैत्रा. ६।३८
ततः शुभाशुभकर्माणि सर्वाणि
सवासनानि नश्यंति त्रि.म.ना. ५।५
ततः शुष्कवृक्षवन्मूर्च्छानिद्रामय-
निश्श्वासोच्छ्वासाभावान्नष्टद्वन्द्वः
..मनः प्रचारशून्यं परमात्मनि
लीनं भवति मं.ब्रा. ३।२
ततः शून्यं च द्वौ दिवाकरहरौ तदनु
गोत्रभृन्माया... कामरा. १
ततः श्वेतैर्हयैर्युक्ते भ.गी. १।१४
ततः सदाचारप्रवृत्तिर्जायते, सदा-
चारादखिलदुरितक्षयो भवति त्रि.म.ना. ५।४
ततः सद्गुरुकटाक्षमंतःकरणमाकाङ्क्षति त्रि.म.ना. ५।४
ततः संध्यां सकुशोऽहरहरुपासीत भस्मजा. २।३
ततः सर्गेषुलोकेषु शरीरत्वायकल्पते कठो. ६।४
ततः सर्वं ततः सर्वं ततः सर्वं जगत्.. ग.शो. २।५
ततः सविलासमूलविद्यासर्वकार्यो-
पाधिसमन्विता..अव्यक्तंविशति त्रि.म.ना. ३।७
ततः स विस्मयाविष्टः भ.गी. ११।१४
ततः संवत्सरस्यान्ते ज्ञानयोगमनु-
त्तमम्। आश्रमत्रयमुत्सृज्यप्राप्तश्च
परमाश्रमम् ना.प. ६।३४
ततः साधननिर्मुक्तः सिद्धो भवति
योगिराट्। तत्स्वं रूपं भवेत्तस्य
विषयो मनसो गिराम् ते.बिं. १।३९
ततः सावरणं ब्रह्माण्डं विनाशमेति त्रि.म.ना. ३।५
ततः सुदुर्निरीक्ष्योऽभवत् (इन्द्रः)
तस्मै विद्यामानुष्टुभीं प्रादात्
प्रजापतिः अव्यक्तो. ८
ततः स्तिमितगम्भीरं न तेजो न तम-
स्ततम्। अनाख्यमनभिव्यक्तं
सत्किञ्चिदवशिष्यते महो. २।६५
ततः स्थावरजङ्गमात्मकंजगद्भविष्यति मुद्गलो. ४।५
ततः स्वकार्यान्सर्वप्राणिजीवान्सृष्ट्वा
पश्चाद्याः प्रादुर्भवन्ति मुद्गलो. ४।५

ततः स्वधर्मं कीर्तिं च	भ. गी. २।३३
ततः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम् (पितरः श्राद्धाकर्तारं)	इतिहा. ९३
ततः स्वमनसः स्थैर्यं मनसा विगतैनसा। अहो नु चञ्चलमिदं प्रत्याहृतमपि स्फुटम्	अ. पू. ३।५
तते ब्रह्मघने नित्ये सम्भवन्ति न कल्पिताः। न शोकोऽस्ति न मोहोऽस्ति..न जरास्ति न जन्म वा	महो. ६।१३
ततो गावोऽजायन्त, वडवेतराऽभवत्	बृह. १।४।४
ततोऽङ्गसंविदं स्वच्छां प्रतिभासमुपागताम्। सद्योजातशिशुज्ञानं प्राप्तवान्मुनिपुङ्गवः	अ. पू. ३।१५
ततो जलाद्भयं नास्ति जले मृत्युर्न विद्यते	१ यो. त. ९०
ततो जालन्धरो बन्धः कर्मदुःखौघनाशनः	ध्या. बिं. ७८
ततोऽजावयोऽजायन्त, एवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत	बृह. १।४।४
ततो दक्षिणहस्तस्य अङ्गुष्ठेनैव पिङ्गलाम्। निरुध्य पूरयेद्वायुमिडयातु शनैः शनैः	१ यो. त. ३६
ततो दुःखतरं नु किम्	भ. गी. २।३६
ततो दृढतरशुद्धसात्त्विकवासनया भक्त्यतिशयो भवति	त्रि. म.ना.५।५
ततो दृढतरा वैष्णवी भक्तिर्जायते	त्रि. म.ना.५।४
ततो दृढशरीरः स्यान्मृत्युस्तस्य न विद्यते। ब्रह्मणः प्रलयेनापि न सीदति महामतिः	१यो. त.१०३
ततो देवः प्रीतो भवति स्वात्मानं दर्शयति [नृ.पू. ४।३६+	रामो. ४।४८
ततो देवा अभवन् परासुरा..	बृह.१।३।७
ततो देवास्तमाधिपत्यायानुमेनिरे	अव्यक्तो. ८
ततो देवी स्वात्मानं दर्शयति	आथ. द्वि. २
ततोऽधिकतराभ्यासाद्भूमित्यागश्च जायते। पद्मासनस्थ एवासौ भूमिमुत्सृज्य वर्तते	१यो. त. ५४
ततोऽधिकतराभ्यासाद्बलमुत्पद्यते बहु। येन भूचरसिद्धिः स्याद्भूचराणां जये क्षमः	१ यो. त. ५८
ततोऽधिकतराभ्यासाद्दार्दुरी स्वेन जायते। यथा च दर्दुरो भाव उत्प्लुत्योत्प्लुत्य गच्छति	१ यो. त.५३
ततो न जपो न माला नासनं न ध्यानावाहनादि	ग.शो. ता.५।६
ततो नवरत्नप्रभामण्डलम्	मं. ब्रा. २।३
ततो निधनपतयेत्रयोविंशञ्जुहोति च	श्रु. जा. ३।१४
ततो निधनसामान्यादन्तःसामिकानि निधनानि...	संहितो. ३।१
ततो निरात्मकत्वमेति, निरात्मकत्वान्न सुखदुःखभाग्भवति	मैत्रा. ६।२१
ततो नैकञ्चन वेदेति। कतमे त इति ह प्रतीकान्युदाजहार	बृह. ६।२।३
ततोऽन्नमभिजायते। अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्	मुण्ड. १।१।८
ततोऽन्यद्विभक्तं यच्छृणुयाम्	बृह. ४।३।२७
ततोऽन्यद्विभक्तं यज्जिघ्रेत्	बृह. ४।३।२४
ततोऽन्यद्विभक्तं यद्रसयेत्	बृह. ४।३।२५
ततोऽन्यद्विभक्तं यत्पश्येत्	बृह. ४।३।२३
ततोऽन्यद्विभक्तं यद्वदेत्	बृह.४।३।२६
ततोऽन्यद्विभक्तं यद्विजानीयात्	बृह. ४।३।३०
ततोऽन्यद्विभक्तं यत्स्पृशेत्	बृह. ४।३।२९
ततोऽन्यद्विभक्तं यन्मन्वीत	बृह. ४।३।२८
ततोऽन्यश्चान्तरःस्वतः (विज्ञानात्मा)	कठरु. २१
ततोऽपश्यज्ज्योतिर्मयं श्रिया-ऽऽश्लिङ्गितं सुपर्णस्थं.. मृगमुखं नरवपुषं...	अव्यक्तो. ३
ततोऽपिधारणाद्वायोः क्रमेणैव शनैः शनैः। कम्पो भवति देहस्य..	१ यो. त. ५२
ततो ब्रह्मोपदिष्टं वै सच्चिदानन्दलक्षणम्। जीवन्मुक्तः सदा ध्यायन्नित्यस्त्वं विहरिष्यसि	शु. र. ३।१७
ततो ब्राह्मणः संयोगं संयुयुजे, तमादित्यात्पुरुषो भास्करवर्णो निष्क्राम्य स एवं ग्राहयाञ्चकार	इतिहा. १

ततो भवति भारत — भ. गी.१४।३

ततो भवेद्धठावस्था पवनाभ्यास-
तत्परा। प्राणोऽपानो मनो बुद्धि-
र्जीवात्मपरमात्मनोः — १ यो. त. ६५

ततो भूय इव ते तमो य उ विद्याया
रताः। [ईशा. ९ + — बृह.४।४।१०

ततोभूय इवते तमोयउसंभूत्या रताः — ईशा. १२

ततोऽभ्यासपाटवात् सहस्रशः सदा-
ऽमृतधारा वर्षति — पैङ्गलो. ३।३

ततो मदर्पितकर्मणां मदाविष्टचेतसां
मद्रूपता भवति — भस्मजा. २।१५

ततो मध्याह्नार्कमण्डलम् (दृश्यते) — मं. ब्रा. २।३

ततो मनुष्या अजायन्त — बृह. १।४।३

ततो मया नचिकेतश्चितोऽग्निर-
नित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् — कठो. २।१०

ततो (अविद्याशबलब्रह्मतः) महत्,
महतोऽहङ्कारः, अहङ्कारात्पञ्च-
तन्मात्राणि — त्रि.म.ना. २।५

ततो मात्रा-श्रुतिर्ज्ञेया
निमिषोन्मेष एव च — योगो. ३५

ततोऽमृतत्वमश्नुते — गोपीचं. ८

ततो मां तत्त्वतो ज्ञात्वा — भ. गी. १८।२५

ततो मे श्रियमावह लोमशां
पशुभिः सह स्वाहा — तैत्ति. १।४।१

ततो यदुत्तरतरं तदरूपमनामयम्।
य एतद्विदुरमृतास्ते भवन्त्यथेतरे
दुःखमेवापियन्ति — श्वेता. ३।१०

ततो याति परां गतिम् — भ.गी.६।४५
[+१३।२९+१६।२२

ततो यान्त्यधमां गतिम् — भ. गी.१६।२०

ततो युञ्जीत मेधावी..मनः पूर्वं
मनः सर्वं मनस्तस्मान्न लङ्घयेत् — योगो. २।१६

ततो युद्धाय युज्यस्व — भ. गी. २।३८

ततो योगवित्तमाः समाधिं
धर्ममेघं प्राहुः — पैङ्गलो. ३।३

ततो योषाग्नौ जायन्ते, लोकान्प्रत्यु-
त्थायिनस्त एवमेवानु परिवर्तन्ते — बृह. ६।२।१६

ततो योऽस्य भर्गाख्यस्तं
सञ्चिन्तयामि... — कौ. उ. ६।७

ततो रक्तोत्पलाभासं पुरुषायतनं
महत्। तत्र सञ्चारयेत्प्राणा-
नूर्णनाभीव तन्तुना — क्षुरिको. १०

ततो रहस्युपाविष्टः प्रणवं प्लुत-
मात्रया।... जपेत्पूर्वार्जिता-
नां तु पापानां नाशहेतवे — १ यो. त. ६३

ततो रात्रिरजायत (रात्र्यजायत) — महाना. ६।१
[ऋ.अ.८।८।४८=मं.१०।१९०।१
[+ तै. आ. १०।१।१३

ततो वक्ष्यामि ते हितम् — भ. गी. १८।६४

ततो वह्निशिखामण्डलं क्रमाद्दृश्यते — मं. ब्रा. २।३

ततो वायुस्थैर्यम्। तच्चिह्नानि–
आदौ तारवद्दृश्यते, ततो वज्र-
दर्पणम्.. — मं. ब्रा. २।३

ततो विज्ञान आत्मा तु ततोऽन्यश्चा-
न्तरः स्वतः। आनंदमय आत्मा तु
ततोऽन्यश्चान्तरः स्थितः — कठरु. २१

ततो विलीनपाशोऽसौ विमलः कमला-
प्रभुः। तेनैव ब्रह्मभावेन
परमानन्दमश्नुते — ना.बिं. २०

ततो विशुद्धं विमलं विशोकमशेष-
लोभादिनिरस्तसङ्गम्। यत्त-
त्पदं.. तदेव स वासुदेवो.. — गो.पू. ४।३

ततो विष्वङ् (अयं) व्यक्रामत् — त्रि.म.ना. ४।४
[पु.सू. ऋ.अ.८।४।१७= — मं. १०।९०।४
[वा.सं. ३१।४ + — चित्स्यु. १२।२

ततो वै खलु दुर्निष्प्रपतरं यो यो
ह्यन्नमत्ति यो रेतः सिञ्चति
तद्भूय एव भवति (मा.पा.) — छां.उ. ५।१०।६

ततो वै गृहीतायां शक्त्यां ब्रह्मणः
सृष्टिरजायत — ग.शो. ३।११

ततो वै ध्यानस्थिता अभू-
वन् (देवाः) — ग.शो. ४।६

ततो वै परस्परमसहमानाश्चोर्ध्वं
जग्मुः (देवत्रयम्) — ग.शो. ४।६

ततो वै भूतेभ्यश्चतुर्दश लोका
जायेरन् — ग.शो. ४।५

ततो वैराग्यमुदेति (भक्त्या) — त्रि.म.ना. ५।४

ततो वै सत्त्वं (विष्णुः) तामा-
दाय जगत्पाति स्म — ग.शो. ३।१२

ततो वै सदजायत तैत्ति. २।७
ततो वै सृष्टिमचीकरत् (ब्रह्मा) ग.शो. ३।६
ततो वै सोऽहमभूत् । नैकाकिता-
त्युक्तेति गुणान् निर्ममे ग.शो. ३।४
ततो व्यैच्छत् व्येवास्मा उच्छति अव्यक्तो. ६
ततोऽश्वः समभवत्, यदश्वत्तन्मेध्यम-
भूत्, तदेवाश्वमेधस्याश्वमेधत्वम् बृह. १।२।७
ततोऽसंसक्तिनामिका (ज्ञानभूमिः) महो. ५।२५
ततोऽसौ सन्नियोगेन निरालम्बो
भवेद्यदि । तदा समरसीभूतः
परमानन्द एव सः अमन. २।९५
ततो ह बालिशा ऊचुरवात्त वा
संवत्सरमिमे ब्राह्मणाः छाग. ५।१
ततो हवै तद्रेतस्तदिमाःप्रजाःप्रजायन्ते प्रश्नो. १।१४
ततो ह वै ते देवा रुद्रमपृच्छन्,
ते देवा रुद्रमपश्यन् अ.शिरः. ११
ततो ह वै विदाञ्चकार ब्रह्मेति(मा.पा.) केनो. ४।१
ततोऽहंनामाऽभवत् तस्मादप्येतर्ह्या-
मंत्रितोऽहमयमित्युक्त्वाऽथा-
न्यन्नाम प्रब्रूते बृह. १।४।१
ततो ह्यसुराः पुनरेवोदयन्ति, ते ह
माध्यन्दिनस्यैव सवनस्य
पवमानेषु यज्ञवास्त्वभवन् शौनको. ३।१
ततो ह्यसुराः पराभवन् [शौनको.२।४+ ३।४
ततो हिरण्यगर्भोऽजायत, तस्माद्दश
प्रजापतयो मरीच्यादयः...अजायन्त सङ्कर्षणो. १
ततो हृदयस्थिताः कामाः सर्वे विन-
श्यन्ति तस्माद्धृदयपुण्डरीक-
कर्णिकायांपरमात्माविर्भावोभवति त्रि. म.ना.५।४
ततो ह्येंद्रोऽपश्यत्, स ह गायत्रीमेव
प्रतिसन्दिदेश शौनको. १।२
ततो हैव विदाञ्चकार ब्रह्मेति (इन्द्रः) केनो. ४।१
तत्कथमिति अज्ञानप्राबल्यात् त्रि.म.ना. ५।३
तत्कर्म कृत्वा विनिवर्त्य भूय-
स्तत्त्वस्य तत्त्वेन समेत्य योगम् ।
एकेन द्वाभ्यां त्रिभिरष्टभिर्वा..
कालगुणैश्चसूक्ष्मैः। आरभ्यकर्माणि श्वेता. ६।३

तत्कर्मणा करोति [बृहज्जा. १।१+ नृ.पू. १।१
तत्कारणशरीरम् (आनंदमयकोशः) पैङ्गलो. २।५
तत्कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा
देवं (देवीं) मुच्यते सर्वपाशैः श्वेता.६।१३
[गुह्यका. ७१+ भवसं. २।४८
तत्किं कर्मणि घोरे मां भ.गी. ३।१
तत्कुरुष्व मदर्पणम् भ.गी. ९।२७
तत्केन कमभिवदेत्, तत्केन कं
मन्वीत, तत्केन कं विजानीयात्
येनेदꣳ सर्वꣳ विजानाति, तं
केन विजानीयाद्विज्ञातारम्.. बृह. २।४।१४
तत्केन कं जिघ्रेत्.. तत्कं विजानी-
यात्, येनेदं सर्वꣳ विजानाति, तं
केन विजानीयाद्विज्ञातारं.. बृह.२।४।१४
तत्केन कं पश्येत्तत्केन कं
जिघ्रेत्तत्केन कं रसयेत्... बृह. ४।५।१५
तत्केन कं मन्वीत बृह. २।४।१४
तत्केन कं विजानीयात्, येनेदं
सर्वꣳ विजानाति तं केन
विजानीयाद्विज्ञातारं.. बृह. ४।५।१५
तत्केन कं स्पृशेत्तत्केन कं विजानी-
यात् ... बृह. ४।५।१५
तत्कैवल्यपदं विदुः अ. पू.५।१९
तत्तत्कार्यकारणभेदरूपेणांशतत्त्व-
वाचक-वाच्य-स्थानभेद-विषय-
देवताकोशभेद-विभागा भवन्ति त्रि. ब्रा. १।२
तत्क्षामये त्वामहमप्रमेयम् भ. गी.११।४२
तत्क्षेत्रं यच्च यादृक् च भ. गी. १३।४
तत्तज्जन्तुध्वनौ चित्तसंयमात्सर्व-
जन्तुरुतज्ञानं भवति शाण्डि.१।७।५२
तत्तदेवावगच्छ त्वम् भ. गी.१०।४१
तत्तदेवेतरो जनः भ. गी. ३।२१
तत्तत्पदविरक्तस्य....आनन्दः
स्वयं भाति कठ. रु. ३३
तत्तत्प्राधान्येन तत्तद्व्यपदेशः,
वस्तुतस्त्वभेद एव त्रि.म.ना. १।४
तत्तत्प्राप्य शुभाशुभम् भ. गी. २।५७

तत्तत्स्थाने (चित्तस्य) संयमा-
तत्तत्सिद्धयो भवन्ति शांडि. १।७।५२

तत्तदरश्च (तदरश्च) वै ण्यश्चार्णवौ
ब्रह्मलोके तृतीयस्यामितो दिवि
तदैरं मदीयँ सरस्तदश्वत्थः छां. उ. ८।५।३

तत्तद्देवताग्रहान्वितैः श्रोत्रादि-
ज्ञानेन्द्रियैः..जाग्रदवस्था भवति पैङ्गलो. २।७

तत्तद्ब्रह्ममार्गे सम्यक्सम्पन्नः शुद्ध-
मानसः प्राणसन्धारणार्थं.. भैक्ष्य-
माचरन्..स परमहंसो नाम जाबा. ६

तत्तद्रूपमनुप्राप्य ....

तत्तद्वृत्तिव्यापारभेदेन पृथगाचारभेदः ना.प. ५।१२

तत्तमः खल्वीरितं तमसः संप्रास्रवति मैत्रा. ५।५

तत्तस्माद्यज्ञोपवीत्येवाधीयीत,
याजयेद्यजेत वा सहवै. १

तत्तस्यैतत्ते यदसावादित्य ओमित्ये-
तदक्षरस्य चैतत्तस्मादोमित्यने-
नैतदुपासीत मैत्रा. ६।४

तत्तात्समुदाहृतम् भ.गी. १७।१९,
[२२+ १८।२२,३९

तत्तारकं द्विविधं—पूर्वार्धंतारकमुत्तरा-
र्धममनस्कं चेति अद्वयता. ४

तत्तारकं द्विविधं मूर्तितारकममूर्ति-
तारकं चेति अद्वयता. ५

तत्तुर्यातीतचिन्मात्रं स्वमात्रं
चिन्तयेऽन्वहम् तुरीया.शीर्षकं

तत्तृप्यति तस्यानुतृप्तिं तृप्यति प्रजया
पशुभिरन्नाद्येन तेजसा ब्रह्म-
वर्चसेनेति (मा.पा.) छां.उ. ५।२०।२

तत्ते कर्म प्रवक्ष्यामि भ.गी. ४।१६

तत्तेज आत्मचैतन्यरूपं बलमवष्टभ्य
गुणैरैक्यं सम्पाद्य.. चिन्तयन्
वसेत् नृसिंहो. ३।४

तत्तेज आचष्ट वदन्त्येति तत्रैत-
देव शुङ्गमुत्पतितँ सोम्य
विजानीहि छान्दो. ६।८।५

तत्तेज ऐक्षत बहु स्यां प्रजायेयेति छान्दो. ६।२।३

तत्तेजो विद्धि मामकम् भ.गी. १५।१२

तत्तेजोऽसृजत, तत्तेज ऐक्षत बहुस्यां.. छान्दो. ६।२।३

तत्ते पदं संग्रहेण प्रवक्ष्ये भ. गी. ८।११

तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् कठो. २।१५

तत्त्रयोदशं प्राणं मनो विज्ञानमिति
विज्ञाय तं तपसा द्वादश द्वाद-
शानंद इति सैषा दशान्नं न निंद्यात् तैत्ति. ३।११

तत्त्वंपदं ब्रह्मतत्त्वं स्वमात्रमवशिष्यते यो. शि.शीर्ष.

तत्त्वज्ञामोपायसिद्धं परतत्त्वस्वरूपकम् ।
शारीरोपनिषद्वेद्यं श्रीरामब्रह्ममेगतिः शारी.शीर्ष.

तत्त्वचाऽजिघृक्षत्, तन्नाशक्नोत्त्वचा
ग्रहीतुम्, स यद्धैनं तत्त्वचाऽग्रहैष्यत् २ ऐत.३।७

तत्त्वज्ञानं गुहायां निविष्टमज्ञानिकतं
मार्गं सुष्ठु वदन्ति स्वसंवे. ३

तत्त्वज्ञानं मनोनाशो वासनाक्षय
एव च । मिथः कारणतां गत्वा अ.पू. ४।८१

तत्त्वज्ञानार्थदर्शनम् भ.गी. १३।१२

तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ना. बिं. २२

तत्त्वतश्च शिवः साक्षाच्चिज्जीवश्च
स्वतः सदा । चिच्चिदाकारतो
भिन्ना न भिन्ना चित्त्वहानितः रुद्रहृ. ४४

तत्त्वतस्त्वेक एव सन्न्यासः, अज्ञानेना-
शक्तिवशात् कर्मलोपश्च..
चातुर्विध्यमुपागतः ना.प. ५।२

तत्त्वतो जायते यस्य जातं तस्य
हि जायते अद्वैत. २७

तत्त्वतो भिद्यमाने हि मर्त्यतामनृतं
व्रजेत् अद्वैत.१९

तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति
केवलम् । व्यावहारिकदृष्टिस्तु पा. ब्र. २४

तत्त्वप्रदीपप्रकाशं स्वात्मानं पश्यन्
योगी मत्सायुज्यमवाप्नोति वासुदे. ५

तत्त्वब्रह्ममार्गे सम्यक्सम्पन्नःशुद्ध-
मानसः प्राणसन्धारणार्थं.. विमुक्तो
भैक्षमाचरन्..सन्न्यासेन देहत्यागं
करोति स परमहंसो नाम याज्ञव. ३

तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः...
याचिताहारमाहरन्.. समो भूत्वा
निर्ममः.. सन्न्यासेनैव देहत्यागं
करोति स कृतकृत्यो भवति ना.प.३।८७

तत्त्वत्रयस्य विज्ञानं... स्वधर्माचरणं ..मन्त्रार्थचिन्तनं श्रवणं कीर्तनम्। एते ते कथिता राजन्पारमैकान्त्य-सिद्धिदाः भवसं.५।१८
तत्त्वमसि श्वेतकेतो [छान्दो.६।८।७+ ६।९।४ —६।१४।३+शु.र.।२।३+ पैङ्गलो. ३।१
तत्त्वमसि, अहं ब्रह्मास्मि, सर्वं खल्विदं ब्रह्म, नेह नानास्ति किञ्चनेत्यादि महावाक्यार्थानुभवज्ञानाद्ब्रह्मै-वाहमस्मीति... निरा. ३१
तत्त्वमसि...अहंब्रह्मास्मीत्यनु-सन्धानं कुर्यात् पैङ्गलो. ३।१
'तत्त्वमसि' इत्यादिवाक्यविचारः मठाम्ना. ३
तत्त्वमसीत्यभेदवाचकं ये जपन्ति ते शिवसायुज्यमुक्तिभाजो भवन्ति शु.र. ३।५
तत्त्वमसीत्यहं ब्रह्मास्मीति वाक्यार्थ-विचारः श्रवणं... . पैङ्गलो. ३।२
तत्त्वमसीत्युपदेशेन त्वमेवाहमहमेवं त्वमिति तारक...कृतार्थो भवति मं.ब्रा. ३।२
तत्त्वमसीत्येवं सम्भाष्यते। अयमात्मा ब्रह्मेति वा.. बह्वृचो. ४
तत्त्वमस्यादिवाक्यं तु केवलं मुक्तिदं यतः रामर. ५।१५
तत्त्वमस्यादिवाक्यानिब्रह्मणैकत्वंजगुः पैङ्गलो.२।६
तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु मुह्यति अमन. २।१८
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः। तत्त्वीभूतस्तदा रामस्त-त्त्वादप्रच्युतो भवेत् वैतथ्य. ३९
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः २ यो.त. २
तत्त्वमिच्छामि वेदितुम् भ.गी.१८।१
तत्त्ववित्तु महाबाहो भ.गी. ३।१८
तत्त्वस्य तत्त्वेन समेत्य योगम्। श्वेता. ६।३
तत्त्वं पूषन्नपावृणु, सत्यधर्माय दृष्टये। पूषन्नेकर्षे यम..[ईशा. १५+ बृह. ५।१५।१
तत्त्वं तत्सहजस्वभावममलं तेजो-ऽमनस्के ध्रुवम् अमन. २।७६
तत्त्वं नारायणः परः।..यच्च किञ्चि-ज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः महाना.९।४
तत्त्वानीति च तद्विदः वैतथ्य. २०
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते...[वनदु.४३,५६,६८,७९ ऋ.अ.१।२।१५ [=मं.१।२४।११+वा.सं.१८।४९+ तै.ब्रा.२।३।११ [तै.सं.२।१।११।६+
तत्त्वावबोध एवासौ वासनातृण-पावकः। प्रोक्तः समाधियोगेन न तु तूष्णीमवस्थितिः महो. ४।१२
तत्त्वाविचारपाशेन बद्धं द्वैतभया-तुरम्। उज्जीवयन्निजानन्दे स्वस्वरूपेण संस्थितः द. मू. २०
तत्त्वीभूतस्तदा रामस्तत्त्वा-दप्रच्युतो भवेत् वैतथ्य. ३९
तत्त्वेनातश्च्यवन्ति ते भ. गी. ९।२४
तत्त्वेव भयं विदुषो भवति तैत्ति. २।७
तत्पतित्वात्पशुपतिः जाबाल्यु. ३
तत्परमरहस्यशिवतत्त्वज्ञानं (शिव-साक्षात्करणं) द.मू. २
तत्परमित्यक्षरं गुह्यम् (ओमित्यक्षरं) सन्ध्यो.२०
तत्परमित्याह, यमेतेनाप्नुवन्ति ग.शो. ३।२
तत्परं ज्योतिरोमिति [यो.शि.६।५६ +यो. चू. ८५
तत्परं नापरं त्यजति। तदेव कपा-लाष्टकं सन्धाय य एष स्तनइवा-वलम्बते सेन्द्रयोनिः परब्र. २
तत्परं यच्चित्तं परमात्मानमानन्दयति परब्र. २
तत्परः परमात्मा च श्रीरामः पुरुषोत्तमः तारसा. २।५
तत्परः संयतेन्द्रियः भ.गी. ४।३९
तत्पारिणममानमभूत् (ब्रह्माण्डं) ततः परमेष्ठी व्यजायत अव्यक्तो. १
तत्परिभाषया कामःककारं व्याप्नोति। काम एवेदं तत्तदितिककारो गृह्यते त्रि.ता. १।५
तत्परेणप्रेरितं विषमत्वंप्रयाति(तमः) मैत्रा. ५।५

तत्पर्वते कर्मज्ञानमयीभिर्बहु-
शाखा भवन्ति सीतो. ११
तत्पश्चात्तत्परेणेरितं विषमत्वं प्रयाति मैत्रा. ५।५
तत्पार्श्वे (मनसः) संयमाग्नि-
श्रतिलोकज्ञानम् शांडि. १।७।५२
तत्पुरुषस्य विश्वमाजानमग्रे चित्यु. १।३१
तत्पुरुषं पुरुषो निवेश्य नास्य
प्रजा संवत्सरा जायन्ते महो. १।२
तत्पुरुषाद्वायुः, तस्माच्छान्तिः, तस्याः
श्वेतवर्णा सुशीला (गौः),तस्याः
गोमयेन क्षारं जातम् बृ.जा. १।६
तत्पुरुषाय विद्महे चक्रतुण्डाय
धीमहि । तन्नो नंदिः प्रचोदयात् महाना. ३।४
तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् [महाना. ३।२+१०।७
तत्पुरुषाय विद्महे महासेनाय.. तन्नः
षण्मुखःप्रचोदयात् [महाना.३।५+ वनदु.१३३
तत्पुरुषस्य विद्महे सहस्राक्षस्य महा-
देवस्य धीमहि । तन्नो रुद्रः
प्रचोदयात् महाना. ३।१
तत्पुरुषाय विद्महे सुवर्णपक्षाय.. तन्नो
गरुडः.. [महाना. ३।६+ वनदु. १३४
तत्पुरुषाय विद्महे वक्रतुण्डायधीमहि ।
तन्नो दंती (दन्तिः) प्रचोदयात् महाना. ३।३+
[वनदु. १३२+ ग.शो. २।१
तत्पुरुषो नादः, बिन्दुरीशानः,
(ओङ्कारस्य) ना.पू.ता. १।३
तत्पुरुषोऽमानवः स एनान्ब्रह्म
गमयति छान्दो.५।१०।२
तत्पूजनं (मानसं) मोक्षफलप्रदम् मं.ब्रा. १।४
तत्पृथ्वीमण्डले क्षीणे वलिरायाति
देहिनाम् । तद्वदापो गणापाये
केशाः स्युः पाण्डुराः क्रमात् वराहो. ५।४
तत्पृष्ठदेशे विदले समन्तान्न्यस्ता सुधा
मानवदष्टधधृष्टया.. १ बिल्वो. ५
तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं, प्रज्ञा-
नेत्रो लोकः, प्रज्ञा प्रतिष्ठा,
प्रज्ञानं ब्रह्म २ ऐत. ५।३

तत्प्रतिबिम्बितं यत्तत्साक्षि चैतन्य-
मासीत् पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तदीश्वरचैतन्यमासीत् पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तद्विराट्चैतन्यमासीत् पैङ्गलो. १।२
तत्प्रतिबिम्बितं यत्तद्धिरण्यगर्भचैतन्य-
मासीत् पैङ्गलो. १।३
तत्प्रतिष्ठेत्युपासीत तैत्ति. ३।१०।३
तत्प्रथमावरणे पश्चिमे सम्मुखे स्वर्ण-
मण्डपे देवकन्या राधोप. २।१
तत्प्रमार्जनमात्रं तु मोक्षइत्यभिधीयते अ.पू. ४।५६
तत्प्रसादात्परां शान्तिं भ.गी.१८।६२
तत्प्राणेनाजिघृक्षत् तन्नाशक्नोत्
प्राणेन ग्रहीतुम् २ ऐत. ३।४
तत्प्राणेषूत्क्रान्तेषु शरीरंश्वयितुमध्रियत बृह. १।२।६
तत्प्राणोऽभिरक्षति शिरोऽन्नमथोमनः अ.शिरः.३।१४
तत्प्राप्तिहेतुज्ञानं च कर्म चोक्तं... भवसं. १।३२
तत्र का परिदेवना भ. गी. २।२८
तत्फलश्रुतिरितितस्योर्ध्वंकिं वदामेति बृ. जा. १।४
तत्र को मोहः कः शोकः, एकत्व-
मनुपश्यतः [ईशा. ७+ ना. प. ९।१२
तत्र चक्रं द्वादशारं तेषु विष्ण्वादि-
मूर्तयः । अहं तत्र स्थितिश्चक्रं
भ्रामयामि स्वमायया त्रि.ब्रा. ६०
तत्र चत्वारः—अकारश्चायुतावयवा-
न्वितः, उकारः सहस्रावयवा-
न्वितः, मकारः शतावयवोपेतो-
ऽर्धमात्राप्रणवोऽनन्तावयवाकारः ना.प. ८।३
तत्र चान्द्रमसं ज्योतिः भ.गी. ८।२५
तत्र तत्र परंब्रह्म सर्वत्र समवस्थितम् पैङ्गलो. ४।२२
तत्र तमोनिवृत्तिः (कुण्डलिन्यां
नाड्यां)तद्दर्शनात् सर्वपाप-
निवृत्तिः मं.ब्रा. १।२
तत्र (अविद्याण्डे) तत्त्वतो
गुणातीतशुद्धसत्त्वमयो लीला-
गृहीत.. मायोपाधिको
नारायण आसीत् त्रि.म.ना. २।५
तत्र तं बुद्धिसंयोगं भ.गी. ६।४३
तत्र ता ऋचस्तदृचां मण्डल९स
ऋचां लोकः महाना. १०।१

तत्र तिष्ठत्प्रतीक्षंस्तद्गुरोरागमनं क्रमात् । शिवो. ७।३५
तत्र तेऽपृथग्धर्मिणोऽपृथग्विवेक्याः मैत्रा. ६।२२
तत्र त्रयीमयं शास्त्रमाद्यं सर्वार्थदर्शनम् । ऋग्यजुस्सामरूपत्वात् त्रयीति परिकीर्तिता सीतो. १२
तत्र दश यमाः तथा (१०) नियमाः, आसनान्यष्टौ शांडि. १।१।२
तत्र दीपप्रकाशं स्वमात्मानं परं ब्रह्मैवाहमस्मीति भावयन् योगी मत्सायुज्यमवाप्नोति गोपीचं. ४
तत्र देवता मार्ताण्डादिभान्वादित्य-हंस-सूर्य-दिवाकर-तपन-भास्कराः...ङ्न्ताः सूर्यता. ५।१
तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः । तिस्रो मात्रार्धमात्रा च त्र्यक्षरस्य शिवस्य च [ब्र.वि. ३+ १ प्रणवो. ३
तत्र (मथुरायां) द्वादशादित्या एकादश रुद्रा अष्टौ वसवः.. चतुर्विंशतिर्भवन्ति गोपालो. १।१७
तत्र (नाभौ) द्वादशारयुतं चक्रं, तच्चक्रमध्ये पापपुण्यप्रचोदितो जीवो भ्रमति शांडि. १।४।४
तत्र (ऊर्ध्वं) न किञ्चिद्ददृशुः (त्रयो देवाः) ततश्चाधः प्रदेशे.. ग.शो. ४।६
तत्र नाडी सुषुम्ना तु नाडीभिर्बहुभिर्वृता ।.. शुक्लां नाडीं समाश्रयेत् क्षुरिको. ८
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः । तत्र नाडीसहस्रेषु.. ध्या.बि. ५१
तत्र परमहंसा नाम संवर्तकारुणि-श्वेतकेतुदुर्वास.. प्रभृतयो-ऽव्यक्तलिङ्गाः.. सर्वं.. परित्यज्यात्मानमन्विच्छेत् जाबा. ६
तत्र (हृदब्जे) पश्येत्परात्मानं वासुदेवमकल्मषम् त्रि.ब्रा.२।१००
तत्र पारोक्ष्यशबलः सर्वज्ञत्वादिलक्षणोमायोपाधिःसच्चिदानन्दलक्षणो जगद्योनिः पैङ्गलो. ३।१
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः (भगवच्छब्दः) भवसं. २।५१
तत्र (अप्सु) पूर्णानन्दमयः श्रीकैशोरकृष्णः...गोरोचनातिलको महाविष्णुः (आस्ते) राधोप. ३।१
तत्र प्रजापतिर्वायुर्भूत्वाश्राम्यतेदं सृजेयमिति २गोपीचं. २७
तत्र प्रथमो मत्स्यावतारः, द्वितीयः कूर्मः, तृतीयो वराहः..नारसिंहः, ..वामनः..परशुरामः,..रामः, कृष्णः,..बौद्धः..कल्किः ना.पू. ता. ५।२
तत्र प्रयाता गच्छन्ति भ. गी. ८।२४
तत्र प्राच्यामैश्वर्यस्थानं (शिवस्य) भस्मजा. २।९
तत्र बुद्ध्यादीनि स्वादूनि भवन्ति । अध्यवसायसङ्कल्पाभिमानाः.. पञ्च स्वादूनि.. मैत्रा. ६।१०
तत्र ब्रह्मचारिणश्चतुर्विधा भवन्ति–गायत्रो ब्राह्मणः प्राजापत्यो बृहन्निति आश्रमो. १
तत्रब्रह्माचतुर्मुखोऽजायत [महो.१।४ +चतुर्वे. १
तत्र भवत्यः (श्रुतयः) सर्वलोकैः कृष्णसौन्दर्य क्रीडाभोगा गोपिका स्वरूपैः.. कृष्णं भजिष्यथ गोपीचं. २७
तत्र मध्यमपादप्रदेशेऽमिततेजःप्रवाहाकारतयानित्यवैकुण्ठंविभाति त्रि.म.ना.१।४
तत्र महर्षयः परिदेवयाञ्चक्रिरे महच्छोकभयं प्राप्ताः स्मो न चैतत्सर्वं समभिहितं ते वयं भगवन्तमेवोपधावाम २ प्रणवो. १९
तत्र मृत्स्नां (मृदं) श्वेतां 'उद्धृतसि' इत्युद्धरेत् [कात्याय. १+ नारदो. १
तत्र यदुक्तं तदंशो रूपमभूत् । यदुरितं तन्मायायाः अव्यक्तो. १
तत्र (हृद्ग्रन्थौ) यत्प्रकाशते चैतन्यं स क्षेत्रज्ञ इत्युच्यते सर्वसा. ७५

तत्र योगरताः केचिन्नैव जानन्ति तारकम् ।. केचिद्ध्यानविमोहिताः । जपेन केचित्क्लिश्यन्ति नैव जानन्ति तारकम् — अमन. १।४
तत्र योनिं कृण्वते न हि ते पूर्वमक्षिपत् — श्वेताश्व. २।७
तत्र रक्षांसिपैशाचानचविद्वेष्टियोनरः — इतिहा. ६२
तत्र लोका वेदाः शास्त्राणि पुराणानि ..ज्योतींषि शिवशक्तियोगादित्येवं घटना व्यापठ्यते — त्रि. ता. १।४
तत्र यथाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट् कामाय — बृह. ४।१।३
तत्र विश्व एव जाग्रद्व्यवहारलोपा-न्नाडिमध्यं चरंस्तैजसत्व-मवाप्य...स्वभासा भासयन् यथेप्सितं स्वयं भुङ्क्ते — पैङ्गलो. २।७
तत्र (मठे) वेदान्तश्रवणं कुर्वन् योगं समारभेत् — शांडि. १।५।१
तत्र वैखानसा अकृष्टपकौषधि-वनस्पतिभिः..अग्निपरिचरणं कृत्वा..आत्मानं प्रार्थयन्ते — आश्रमो. ३
तत्र श्रीर्विजयो भूतिः — भ. गी.१८।७८
तत्र (नाड्यां) सञ्चारयेत्प्राणा-नूर्णनाभीव तन्तुना — क्षुरिको. ९
तत्र सत्त्वं निर्मलत्वात् — भ. गी. १४।७
तत्र संलीयते संविन्निर्विकल्पं च तिष्ठति । भूयो न वर्तते दुःखे तत्र लब्धपदः पुमान् — अ. पू. ४।६९
तत्र सुषुम्ना विश्वधारिणी मोक्षमार्गेति चाचक्षते — शांडि. १।४।६
तत्र सूर्योऽग्निर्नाम सूर्यमण्डलाकृतिः सहस्ररश्मिपरिवृत एकऋषि-र्भूत्वा मूर्धनि तिष्ठति — प्रा. हो. २।४
तत्र स्थिते मनसि चक्षुर्मध्यगतनील-ज्योतिष्पश्यति । एवं हृदयेऽपि — मं. ब्रा. १।३
तत्र स्थिते मनसि चक्षुर्मध्यगत-ज्योतिःस्थलं त्रिलोक्यान्तर्दृष्ट्या निरतिशयं सुखं प्राप्नोति — अद्वयता. २
तत्र (राधाकुण्डे)स्नात्वाराधाङ्गंभवति — राधोप. २।१
तत्र ह कुरुपाञ्चालानां ब्राह्मणा अभिसमेता बभूवुः — बृह. ३।१।१
तत्र हि रामस्य राममूर्तिः प्रद्युम्नस्य प्रद्युम्नमूर्तिः..वनेष्वेवं.. द्वादशमू-र्तयो भवन्ति — गोपालो. १।१९
तत्राज्यस्य पर्णमयी जुहूर्भवति — भस्मजा. १।२
तत्रादौ हरिसंस्काराः कर्तव्या मोक्षकांक्षिणाम् । अयमेव परोधर्मः प्रधानं सर्वकर्मणाम् — भवसं. २।६७
तत्राधस्तनमेकंपादमविद्याशबलंभवति — त्रि.म.ना.१।४
तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेत् — बृह. ४।३।३१
तत्रापरा तु विद्यैषा ऋग्वेदो यजु-रेव च ।..निरुक्तं छन्द एव च — रुद्रह. २८
तत्रापश्यत् स्थितान् पार्थः — भ. गी. १।२६
तत्रापश्यन्महामायां.. पर्यङ्कस्थां परिचरन्तीमादिदेवं... — लक्ष्म्यु. २
तत्रापि दहं गगनं विशोकस्तस्मिन्य-दन्तस्तदुपासितव्यम् — महाना. ८।१६
तत्रापि साध्यः पवनस्य नाशः षडङ्ग-योगादिनिषेवणेन — अमन. २।२८
तत्राप्यविमुक्तमभ्यर्हितम् — भस्मजा. २।८
तत्राश्रुबिन्दवो जाता महारुद्राक्ष-वृक्षकाः । स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात् — रु. जा. उ. ३
तत्राष्टदलकेसरमध्ये मणिपीठे सप्तावरणकम् — राधोप. १।४
तत्रास्य यथाकामचारो भवति [+७२।२+—७।७।९।२ — छां. उ.७।१।५
तत्राहमासीनः (शिवः रत्नवेदिकायां) ...तारकं शैवं मनुमुपदिशामि — भस्मजा.२।१५
तत्रैकनाशादपरप्रवृत्तिर्विध्वस्तयोर्मोक्ष-पदस्य सिद्धिः — अमन. २।२८
तत्रैकैकमात्मनो नवांशकं सचारकविधम् — मैत्रा. ६।१४
तत्रैकस्थं जगत्कृत्स्नं — भ. गी.११।१३
तत्रैकाग्रं मनः कृत्वा — भ. गी. ६।१२
तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि — छान्दो. ६।८।३
तत्रैतदेव शुङ्गमुत्पतितं सोम्य विजानीहि — छान्दो. ६।८।५

तत्रैता देवता आवाह्य द्वादशावर-
णानि कुर्यात् सूर्यता. ५।१
तत्रैव मुक्त्यर्थमुपदिश्यते शैवोऽयं
मन्त्रः पञ्चाक्षरः भस्मजा.२।१५
तत्रैव श्वानो गर्दभा मार्जाराः कृमयश्च
मत एव, न श्वानगर्दभौ.. स्वसंवे. ३
तत्रैव सति कर्तारं भ.गी. १८।१६
तत्रैवाव्यक्तसंज्ञकम् भ. गी. ११८
तत्रोद्गातृनास्तावे वोष्यमाणानु-
पोपविवेश छान्दो.१।१०।८
तत्रोन्मदाभिः कान्ताभिर्भोजनै-
र्भोगसञ्चयैः । जनको लाल-
यामास शुकं.. महो. २।२५
अथ) तत्रोमिति शब्दोऽनेनो-
र्ध्वमुत्क्रान्तोऽशब्दे निधनमेति मैत्रा. ६।२२
तत्सगुणनिर्गुणस्वरूपम् ,
तद्वेत्ता विमुक्तः मं. ब्रा. २।१
तत्सङ्कल्पानुसारिणी विविधानन्त-
महामाया शक्तिसंसेवितानन्त-
महामाया... महाविष्णोः.. एतां
महामायां तरन्त्येव ये विष्णुमेव
भजन्ति, नान्ये तरन्ति त्रि.म.ना. ४।९
तत्सत्कुलप्रसूतः पितृमातृविधेयः
पितृसमीपादन्यत्र.. सद्गुरुमा-
साद्य.. विवाह्य...ततः.. वनस्थो
भूत्वा.. सन्न्यस्तुमर्हति ना. प. २।१
तत्सत्यमित्याचक्षते तैत्ति. २।६
(यत्र) तत्सत्यस्य परमं निधानम् मुण्ड. ३।१।६
तत्सत्यं तत्परं पदम् १यो.त. १३६
तत्सत्यं स आत्मा छान्दो.६।८।७
[+६।९।४–६।१६।३
तत्सत्यानृते मिथुनीकरोति ।
तयोर्मिथुनात्प्रजायते,भूयान्भवति १ऐत. ३।६।६
तत्सत्त्वमेवेरितं तत्सत्त्वात्सम्प्रास्रवत् मैत्रा. ५।५
(ॐ) तत्सद्भूर्भुवः सुवस्तस्मै
प्रणात्मने नमोनमः गोपालो. ३।२

तत् (शैवं व्रतं) समाचरेन्मुमु-
क्षुर्नपुनर्भवाय जाबाल्यु. ७
तत्समासेन मे शृणु भ.गी. १३।४
तत्सर्वगतो नहीदं सर्वम् (आत्मा) नृसिंहो. ५।१
तत्सदाऽऽसीत्तत्समभवत् तदाण्डं
निरवर्तत छान्दो.३।१९।१
तत्सर्वमित्याचक्षते (गाणेशं ब्रह्म) ग.शो. ३।१,१
तत्सर्वं भूतं भव्यं यत्किञ्चिद्दृश्य-
मानं स्थावरजङ्गमं तत्सर्वं कालि-
कातंत्रे ओतं प्रोतं वेद कालिको. ३
तत्सवितुरिति पूर्वेणाध्वना सूर्या-
धश्चंद्रिकां व्यालिख्य.. त्रि.ता. १।११
तत्सवितुर्वरेण्यमित्यसौ वा
आदित्यः सविता मैत्रा. ६।७
तत्सवितुर्वरेण्यमित्यादिद्वात्रिं-
शदक्षरीं पठित्वा तदिति
परमात्मा सदाशिवः.. त्रि.ता. १।१०
(ॐ) तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि । धियो यो नः प्रचोदयात् महाना. ११।७
[त्रि.म.ना.७।११ +त्रि.ता.१।१
[ऋ.अ.३।४।१०=मं.३।६२।१० +वा.सं.३।३५
[+तै.सं.१।५।६।४+ साम. २।८१२
तत्सवितुर्वरेण्यं भर्गो देवः क्षीरं
सेचनीयम् त्रि. ता. १।१३
तत्सवितुर्वरेण्यं भर्गोऽस्याभिध्येयं मैत्रा. ६।३४
तत्सवितुर्वृणीमह इत्याचामति छान्दो. ५।२।७
मंत्रः– ऋ.अ. =मं.
[+शत. ब्रा.४।३०।३+ऐत.ब्रा. १५।३।१
[तै.आ. १।११।३
तत्सशक्तिकं गजवक्त्रं गजाकारं
जगदेवावरुन्धे ग.शो. ३।३
तत्संवत्सरमात्रमुषित्वा द्विधाऽकरोत् सुबालो. १।२
तत्संवत्सरस्य मात्रामशयत, तन्निर-
भिद्यत, ते आण्डकपाले रजतं
सुवर्णं चाभवताम् छां.३।१९।१
तत् (मनः)संवत्सरं प्रोष्य पर्येत्यो-
वाच कथमशकततें मज्जीवितु-
मिति छान्दो.५।१।११

तत् (चक्षुः) संवत्सरं प्रोष्य पर्येत्योवाच कथमशकततें मज्जीवितुमिति छान्दो. ५।१।९
तत् (चक्षुः, श्रोत्रं, मनः, रेतः) संवत्सरं प्रोष्यागत्योवाच कथमशकतमदृतेजीवितुमिति [बृह.६।१।९, १०,११,१२
तत् (भस्म) हैमे राजते ताम्रे मृण्मये वा पात्रे निधाय.. अभ्युक्ष्य..संस्थापयेत् भस्मजा. १।३
तत्सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति [नारा.५+देव्यु.२६ महावा. ६
तत्साधने द्वयं मुख्यं सरस्वत्यास्तु चालनम् । प्राणरोधमथाभ्यासादृज्वी कुण्डलिनी भवेत् योगकुं. १।८
तत्सुखं राजसं स्मृतम् भ. गी.१८।३८
तत्सुखं सात्त्विकं प्रोक्तम् भ. गी.१८।३८
तत्सूत्रं विदितं येन स मुमुक्षुः स भिक्षुकः ।..स विप्रः पंक्तिपावनः परब्र. ९
तत्सूर्यो रश्मिभिर्वर्षति, तेनान्नं भवति,अन्नाद्भूतानामुत्पत्तिः मैत्रा. ६।३७
तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चाभवत् तैत्ति. २।६
तत्स्त्रिया आत्मभूयं गच्छति यथा स्वयमङ्गं तथा तस्मादेनां न हिनस्ति २ऐत. ४।२
तत्स्वयं योगसंसिद्धः भ. गी.४।३८
तत्स्वरूपज्ञानां वैदेही मुक्तिश्च भवति हयग्री. ६
तत्स्वरूपध्यानपरा मुनयश्चाकल्पान्ते तस्मिन्नेवात्मनि लीयन्ते अव्यक्तो. ९
तत्स्वरूपात्सृष्टिर्या समुत्पन्ना सा रसिकानन्देन सुसेव्यतां प्राप्ताऽऽसीत् सामर. ३
तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे बृह. १।४।१०
तथाऽक्षरात्सम्भवतीह विश्वम् मुण्ड. १।१।७
तथाचयज्ञेक्रियतेऽरण्येगेयंचाधीमहे संहितो. ३।२
तथा चरेत वै योगी सतां धर्ममदूषयन् । जना यथाऽवमन्येरन् गच्छेयुर्नैव सङ्गतिम् ना. प. ५।४२
तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा । अ. शां. १५
तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः अद्वैत. २९
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च (स्वप्नवत्) अ. शां. ६८
तथा ज्ञातं च चैतन्यं फलमित्यभिधीयते कठरु. ४।४४
तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किꣳ स्यात् बृह. ४।१।६
तथा तत्प्रयोगकल्पः-प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिः षडङ्ग इत्युच्यते योगः मैत्रा. ६।१८
तथा तत्स्वामिन इव सर्वज्ञ ईशः पशुपतिः जाबाल्यु. ४
तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किꣳ स्यात् बृह. ४।१।४
तथा तद्वृत्तिसम्बंधात्प्रमाणमिति कथ्यते कठरु. ४३
तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यात् बृह. ४।१।५
तथा तवामी नरलोकवीराः भ.गी. ११।२८
तथा तेनेदमावृतम् भ.गी. ३।३८
तथाऽऽत्ममनसोरैक्यं समाधिरिति कथ्यते वराहो. २।७५
तथाऽऽत्मा नोपलिप्यते भ.गी. १३।३३
तथाऽऽत्मोपाधियोगेन तद्धर्मो नैव लिप्यते अध्यात्मो. ५२
तथा त्रैलोक्यवलितं ब्रह्मैकमिह दृश्यताम् महो. ६।५७
तथा देहादिसङ्घातं मोहगुणजालकलितं तद्रज्जुसर्पवत्कल्पितम् निर्वाणो. ३
तथा देहान्तरप्राप्तिः भ.गी. २।१३
तथा द्वादशभिर्वर्षैर्लयस्तस्य निरन्तरम्। व्योमवत्तस्य सिद्धिः स्याद्व्योमतत्त्वमयो भवेत् अमन. १।७८
तथा द्वादशमात्रस्तु प्राणायामो विधीयते योगो. २५

तथाऽऽनन्दमयश्चापि ब्रह्मणोऽन्येन साक्षिणा। सर्वान्तरेण पूर्णश्च ब्रह्म नान्येन केनचित् — कठरु. २४

तथा नस्त्वं तात जानीथा यथा यदहं किञ्च वेद — बृह. ६।२।४

तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते। ..सैषा चिदविनाशात्मा स्वात्मेत्यादिकृताभिधा — महो. ५।९९

तथाऽन्तर्ज्योतिरेव यः — भ.गी. ५।२४

तथापि त्वं महाबाहो — भ.गी. २।२६

तथापि दृढता नो चेद्विज्ञानस्य... द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तय — मुक्तिको. १।२८

तथा पुरुषप्रयत्नसाध्यवेदान्तश्रवणादिजनितसमाधिना जीवन्मुक्त्यादिलाभो भवति — मुक्तिको. १।२

तथा पूयति वा अन्नमृते प्राणात् — बृह. ५।१२।१

तथाऽऽप्नोति निबोध मे — भ.गी. १८।५०

तथाप्यथर्वणं तेजसा प्रत्याप्याययेन्मंत्राश्च मामभिमुखीभवेयुर्गर्भा इव — २प्रणवो. ४

तथाप्यसिद्धं चेज्ज्ञानं दशोपनिषदं पठ — मुक्तिको.१।२७

तथाप्यानन्दभुक् चेतोमुखः सर्वगतोऽव्ययः। चतुरात्मेश्वरः प्राज्ञस्तृतीयः पादसंज्ञितः(आत्मनः) — ना. प. ५।७

तथा प्रत्यर्थिकृत्याभिमन्त्रयन्त्रादिकिल्बिषैः (मुच्यते) — सूर्यता. १।१४

तथा प्रलीनस्तमसि — भ.गी. १४।१५

तथाप्राणविपत्तौ तु क्षोभमायाति मारुतः। ततो दुःखशतैर्व्याप्तं चित्तं क्षुब्धं भवेन्नृणाम् — यो. शि. ३०

तथा ब्रह्माणमेव विष्णुमेव रुद्रमेव विभक्तांस्त्रीनेवाविभक्तांस्त्रीनेव लिंगरूपानेव च सम्पूज्योपचारैः.. चिन्तयन्भसेत् — नृसिंहो. ३।४

तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः — अद्वैत. ८

तथा भ्रान्तैर्द्विधा प्रोक्तो ह्यात्मा जीवेश्वरात्मना — जा. द. १०।४

तथा मनोमयो ह्यात्मा पूर्णो ज्ञानमयेन तु — कठरु. २३

तथा मानापमानयोः [भ.गी.६।७ — +१२।१८

तथा यूयं (मुनयः) पञ्चपदं जपन्तः श्रीकृष्णं ध्यायन्तःसंसृतिंतरिष्यथ — गो.पू. ४।१६

तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते — कठो. ३।१५

तथा लोकानकल्पयत् (गणेशः) — ग.शो.ता.३।११

तथा लोकाँऽअकल्पयन् — चित्यु.१२।६+ [ऋ.अ.८।४।१९=मं.१०।९०।१४ — वा.सं.३१।१३

तथा वायुं समारोप्य धारयेच्छिरसि स्थितम्। शिरोरोगा विनश्यंति.. — जा. द. ६।३१

तथा विज्ञानवशतः स्वभावः सम्प्रसीदति — महो. ५।६६

तथा विद्वान्नामरूपाद्विमुक्तः परात्परं जगदम्बामुपैति — गुह्यका. ३८

तथा वृत्तिक्षयाच्चित्तं, स्वयोनावुपशाम्यति [मैत्रा.६।३४+ — मैत्रे. १।८

तथा शुष्यति वै प्राण ऋतेऽन्नात् — बृह. ५।१२।१

तथा शरीराणि विहाय जीर्णानि — भ. गी. २।२२

तथा सर्वाणि कर्माणि योगी दग्ध्वा लयं व्रजेत् — क्षुरिको. २३

तथा सर्वाणि भूतानि — भ. गी. ९।६

तथा सूक्ष्ममनाकाशमसंस्पृश्यमचाक्षुषम्।.. आत्मानं सच्चिदानन्दमनन्तं ब्रह्म.. (ध्यायेत्) — जा. द. ९।४

तथाऽसौ त्यक्त्वा कुणपं न तत्तादृशं पुराप्राप्नुवन्ति (वह्निगतहविर्यजमानमिव) — भस्मजा. २।७

तथाऽहङ्कारसम्बन्धादेव संसार आत्मनः — वराहो. ३।२०

तथा इह निष्काम्याः सकाम्या भूगोपालचक्रेसप्तपुर्यो भवन्ति — गोपालो.१।१५

तथेतः प्रेत्य भवति स क्रतुं कुर्वीत — छान्दो.३।१४।१

तथेतित *समन्तं परिण्यविशन्त — बृह. १।३।१८

तथेति तेभ्य एव प्राण उदगायत् — बृह. १।३।७

तथेति तेभ्यश्चक्षुरुदगायत्, यश्चक्षुषि भोगस्तं देवेभ्य आगायत्, यत्कल्याण पश्यति — बृह. १।३।४

तथेति तेभ्यः प्राण उदगायत् बृह. १।३।३
तथेति परमेष्ठी वक्तुमुपचक्रमे ॐ मिति ब्रह्मेति ना.प. ८।१
तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति छान्दो. १।६।७

तस्योर्ध्वे कुण्डलीस्थानं नाभेस्तिर्यगधोर्ध्वतः। अष्टप्रकृतिरूपा सा.. त्रि.ब्रा. २।६२

तस्योपनिषत्सत्यस्य सत्यमिति, प्राणा वै सत्यं, तेषां वै सत्यम् [बृ.उ. २।१।२०+ मैत्रा. ६।३२

तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च, य एवं वेद बृह. ५।५।३

तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च.. बृह. ५।५।४

तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव माण्डू. १ + [नृ.पू. ४।२ + नृसिंहो. १।२

तस्योपव्याख्यानं भूतं भव्यं भविष्यद्यचान्यत्तत्त्वमंत्रवर्णदेवताछन्दोऋक्कलाशक्तिसृष्ट्यात्मकमिति तारसा. २।५

तस्यो मे किमन्नं किंवास इति यदिदं किञ्चाश्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नम् बृह. ६।१।१४

तस्यो मे बलिं कुरुतेति, तथेति बृह. ६।१।१३

तस्योष्णिग्लोमानि, त्वग्गायत्री, त्रिष्टुम्मांसं, अनुष्टुप्.. १ऐत. १।६।१

तं केन विजानीयाद्विज्ञातारमरे केन कं विजानीयात् बृह. २।४।१४

तं केन विजानीयात् स एष नेति नेतीत्यात्माऽगृह्यो नहि गृह्यते.. बृह. ४।५।१५

तं गणेशं वं गणेशं तं गणेश- मिदं श्रेष्ठम्	गणेशो. २।१
तं चावति स भूत्वाऽसौ तद्गुहः समुपैति तम्	वैतथ्य. २९
तं चेदेतस्मिन्वयसि किञ्चिदुपतपे- त्स ब्रूयात्.. [छान्दो.	३।१६।२,४,६
तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति	बृह. ३।९।२६
तं चेद्ब्रूयुरतिवादसीत्यतिवादस्मीति ब्रूयान्नापह्नुवीत	छांदो.७।१५।४
तं चेद्ब्रूयुरस्मिꣳश्चेदिदं ब्रह्मपुरे सर्वꣳ समाहितꣳ सर्वाणि च भूतानि.. प्रध्वꣳसते वा किं ततोऽति- शिष्यत इति	छान्दो. ८।१।४
तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म	छान्दो. ८।१।२
तं जातमभिव्याददात्सभाणकरोत् सैव वागभवत्	बृह. १।२।४
'तं जानन्नग्नऽआरोहाथा(धा)नो वर्धया रयिम्' (वा.सं ३।१४ अथर्व.३।२०।१) इत्यनेन मन्त्रेणाग्निमाजिघ्रेत्	याज्ञव. १
जायमानं घोषा उलूलवो अनू- दतिष्ठन्त	छान्दो.३।१९।३
तं जायोवाच, तप्तो ब्रह्मचारी कुशल- मग्नीन्परिचचारीन्मा त्वाऽग्नयः परिप्रवोचन्प्रब्रूह्यस्मा इतिं	छान्दो.४।१०।२
तं जायोवाच हन्त पत इम एव कुल्माषा इति	छान्दो. १।१०।७
तं ज्ञात्वा मुच्यते जन्तुः (मा.पा.)	कठो. ६।८
तं तथा कृपयाऽऽविष्टं	भ.गी. २।१
तं तपसा द्वादश द्वादशानन्द इति	तैत्ति. ३।११
तं तमेवेति कौन्तेय	भ.गी. ८।६
तं तं लोकं जयते तांश्च कामांस्तस्मा- दात्मज्ञं ह्यर्चयेद्भूतिकामः	मुण्ड. ३।१।१०
तं तं तन्तुमन्वेके अनुसञ्चरन्ति	सहवै. १०
तं तं नियममास्थाय	भ.गी. ७।२०
तं ते गर्भं हवामहे दशमे मासि सूतवे [ऋ.अ.८।८।४२=	बृह. ६।४।२२ मं.१०।१८४।४२
तं त्वा पृच्छामि क्वासौ पुरुष इति	प्रश्नो. ६।१
तं त्वा भग प्रविशानि स्वाहा	तै.उ. १।४।६
तं त्वौपनिषदंपुरुषंपृच्छामि तंचेन्मे न विवक्ष्यसिमूर्धातेविपतिष्यति	बृह. ३।९।२६
तं दुर्दर्शं गूढमनुप्रविष्टं.. अध्या- त्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति	कठो. २।१२
तं दृष्ट्वा शान्तमनसं स्पृहयन्ति दिवौकसः। लिङ्गाभावात्तु कैव- ल्यमिति ब्रह्मानुशासनम्	ना.प. ४।३७
तं देवतानां परमं च दैवतं... विदाम देवं परमेशमीड्यम्	श्वेता. ६।७
तं देवदेवं शरणं प्रजानां यज्ञात्मकं सर्वलोकप्रतिष्ठम्.. नमस्ते	विष्णुहृ. १।६
तं देवा अब्रुवन् त्वमुक्थमसि त्वमिदं सर्वमसि, तव वयं स्मः...	१ऐत. १।४।७
तं देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति	१ऐत. २।२।२
तं देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति	१ऐत. २।१।५
तं देवा ऊचुरनुजावरोऽसि त्वमस्माकं कुतस्तवाधिपत्यम्	अव्यक्तो. ८
तं देवा प्राणयन्त, स प्रणीतः प्राता- यत प्रातायती ३ँ तत्प्रातरभवत्	१ऐत. १।५।१
तं देवाश्चक्रिरे धर्मꣳ स एवाद्य स उ श्व इति	बृह. १।५।२३
तं देवाः सर्वेऽर्पितास्तदु नात्येति कश्चन, एतद्वै तत्	कठो. ४।९
तं दैवमुख्यं सुरतं भवाय	पारमा. ९।७
तं नायतनं बोधयेदित्याहुः	बृह. ४।३।१४
तं नित्यबोधस्तत्स्वयमेवास्थितिस्तं शान्तमचलं..	प.हं. ३
तं पञ्चशतान्यप्सरसां प्रतिधावन्ति शतं मालाहस्ताः ... तं ब्रह्मा- लङ्कारेणालङ्कुर्वन्ति	कौ.त. १।४
तं पश्चादिग्वलिं कुर्यादथवा खननं चरेत् । पुंसः प्रव्रजनं प्रोक्तं..	पैङ्गलो. ४।५
तं पाकेन मनसा पश्यमन्तितः [ऋक्सं.अ.८।६।१६ [ऐ.आ.३।१।६।५९	३ऐत. १।६।७ =मं१०।११४।४

तं पाणावादायोत्तस्थौ, तौ ह पुरुषꣳ सुप्तमाजग्मतुः बृह. २।१।१५
तं पीठगं येऽनुभजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् गो.पू. ३।३
तं प्रजापतिरब्रवीद्गच्छ देवाना- मधिपतिर्भवेति अव्यक्तो. ८
तं प्रजापतिरिन्द्रं त्रिकलशैरमृतपूर्णै- रानुष्टुभाभिमन्त्रितैरभिषिच्य तं सुदर्शनेन दक्षिणतो ररक्ष अव्यक्तो. ८
तं प्रतिब्रूयाद्विचक्षणादृतवो रेत आभृतं पञ्चदशात्प्रसूतात्.. कर्तयेरयध्वम् कौ.त. १।२
तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषम् १ऐत. १।३।१
तं प्राणं जानन्नग्न आरोहाथा नो वर्धय रयिम् जाबा. ४
तं प्रेतं दिष्टमितोऽग्नय एव हरन्ति छान्दो. ५।९।२
तं बिम्बवन्तं समदं समग्रं स्वाहा पारमा. ८।५
तं ब्रह्माह–अभिधावत मम यशसा विरजां (विजरां) वायं नदीं कौ.त. १।३
तं ब्रह्माह कोऽसीति तं प्रतिब्रूयात्.. कौ.त. १।५
तं ब्रह्मालङ्कारेणालंकुर्वन्ति कौ.त. १।४
तं (योगिनं) ब्रह्मेति स्तुवंति मं.ब्रा. २।९
तं भगवान् नृसिंहः प्रसीदति नृ.षट्च. ७
तं भर्तारं तमु गोप्तारमाहुः चित्त्यु. १४।१
तं भूतिरिति वेदा उपासांचक्रिरे १ऐत. १।८।३
तं मद्गुरुपनिपत्याभ्युवाद सत्य- काम ३ इति छांदो. ४।८।२
तं हंस उपनिपत्याभ्युवाद सत्यकाम.. छान्दो. ४।७।२
तं मन्येत पितरं मातरं च, तस्मै न मुह्येत् संहितो. ३।६
तं माता रेळ्हि स उ रेळ्हि मातरं ३ऐत. १।६।७
[ऋ.अ.८।६।१६=मं. १०।११४।४+
[ऐ.आ. ३।१।६।९९
तं मा भगवाञ्छोकस्य पारं तारयतु छान्दो. ७।१।३
तं मामायुरमृतमित्युपास्स्वायुः प्राणः कौ.त. ३।२
तं मामेव विदित्वोपासीत भस्मजा. २।९
तं मे देवा ब्रह्मणा संविदानौ [तै.आ.३।१४।४+ चित्त्यु. १४।४
तं यज्ञं विद्धि राजसम् भ.गी. १७।२१
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् भ.गी. ६।२३
तꣳ यच्छत वर्षाण्यभ्याचत्तस्माच्छ- तर्चिनः १ऐत. २।१।१
तꣳ यज्ञमिति मन्त्रेण सृष्टियज्ञः समीरितः । अनेनैव च मन्त्रेण मोक्षश्च समुदीरितः मुद्गलो. १।७
तꣳ यज्ञं बर्हिषि प्रौक्षन् [ऋ.अ.८।४।१८=मं.१०।९०।६+ चित्त्यु.१२।३ वा.सं. ३१।९
तꣳ यदा लोकानामन्तानपृच्छाम बृह. ३।३।१
तꣳ यदावसायाश्वांस्तक्षापोह्यापा- गादथ व्यलिष्ट छाग. ६।१
तꣳ यदि स्वरेषूपालभेतेन्द्रꣳ शरणं प्रपन्नो अभूवं... छान्दो.२।२२।३
तꣳ यद्वा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तस्माद्वसिष्ठः १ ऐत.२।२।२
तꣳ यद्वा अब्रुवन्नयं वै नः सर्वेषां वाम इति तस्माद्वामदेवः १ऐत. २।१।५
तꣳ यथा यथोपासते तथैव भवति । तस्माद्ब्राह्मणः पुरुषरूपं परं ब्रह्मैवाहमिति भावयेत् मुद्गलो. ३।३
तꣳ वयं समिधं कृत्वा तुभ्यमग्ने पिदध्मसि सहवै. ७
तꣳ वा एतमात्मानं परमं ब्रह्मोङ्कारं तुरीयोङ्काराग्रविद्योतमनुष्टुभा नत्वा प्रसाद्योमिति संहृत्या- हमित्यनुसन्दध्यात् नृसिंहो. ४।१
तꣳ वा एतमात्मानं जाग्रत्यस्वप्न- मसुषुप्तं स्वप्ने जाग्रतमस्वप्नं, सुषुप्ते जाग्रतमस्वप्नं तुरीये... नृसिंहो. २।१
तꣳ वा एतमाहुरतिपिता बताभूरति- पितामहो बताभूः परमां बत काष्ठां प्रापत्.. बृह. ६।४।२८
तꣳ वा एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव बृह. ४।२।२
तꣳ वा एतं त्रिशिरमात्मानं त्रिशरीरं परं ब्रह्मानुसंदध्यात् नृसिंहो. १।२
तꣳ वा एते देवा आत्मानमुपासते छान्दो. ८।१२।६
तꣳ विदित्वा मृत्युमत्येति हंसो. ४

तत् विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च [बृह. ४।४।२+	निरुक्तो. २।२
तत् विद्याच्छुक्रममृतम्	कठो. ६।१७
तत् विन्दमानां सकलं प्रजन्तीं तं देवमुख्यं सुरतं भवाय स्वाहा	पारमा. ९।७
तत् विरजं नित्यमनुसम्पराय स्वाहा	पारमा. १०।३
तत् विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वम्	श्वेता.६।५
तत् वयं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति	प्रश्नो. ६।६
तत् शतं वर्षाण्यभ्यार्चत्	१ऐत. २।१।१
तत् शान्तमचलमद्वयानन्दविज्ञान-घन एवास्मि	प.हंसो. ३
तत् षड्विंशक इत्येते सप्तविंशं तथा-ऽपरे । पुरुषं निर्गुणं सांख्यमथर्व-शिरसो विदुः	मंत्रिको. १४
तत् षड्ढोतारमृतुभिः कल्पमानम्	चित्स्यु. ११।५
तत् स एष एवंविदुद्गातात्मने वा यजमानाय वा यं कामं कामयेत तमागायति	बृह. १।३।२८
तत् सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति	बृह. २।३।६
तत् स द्वितीयस्याद्यार्धान्त्यं... साम तु जानीयात्	नृ.पू. १।५
तत् समंतं पृथ्वी द्विस्तावत्पर्येति	बृह. ३।३।२
तत् संवत्सरस्य परस्तादात्मन आलभत	बृह. १।२।७
तं सूर्यं भगवन्तं सर्वस्वरूपिणं निगमा बहुधा वर्णयन्ति	सूर्यता. १।२
तत् स्त्री गर्भं बिभर्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति	२ ऐत. ४।३
तत् स्वाच्छरीरात्प्रवृहेन्मुञ्जा-दिवेषीकां धैर्येण	कठो. ६।१७
तत् ह कुमारं सन्तं दक्षिणासु नीय-मानासु श्रद्धाविवेश सोऽमन्यत	कठो. १।२
तत् ह चिरं वसेत्याज्ञापयांचकार	छान्दो. ५।३।७
तत् ह ततएवप्रदुंदध्रे होताऽऽश्वलः	बृह. ३।१।२
तत् ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये	श्वेता. ६।१८
तत् ह देवमात्मबुद्धिप्रकाशं मुमुक्षुः शरणं व्रजेत्	गो.पू. ३।५
तत् ह न मेने शाकल्यस्तस्य ह मूर्धा विपपातापि	बृह. ३।९।२६
तत् हन्ताभ्यागच्छामेति तं हाभ्याजग्मुः	छान्दो.५।११।४
तत् ह पाणावभिपद्य प्रवव्राज, तौ ह सुप्तं पुरुषमीयतुः	कौ.त. ४।१८
तत् ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं, न वै सौम्योऽस्मत्कुलीनो-ऽननूच्य ब्रह्मबन्धुरिव भवतीति	छां.उ. ६।१।१
तत् हप्रजापतिरुवाचमघवन्यच्छान्त-हृदयः प्राव्राजीः किमिच्छन् पुनरागम इति	छां.उ.८।१०।३
तत् ह य एवं वेदाप पुनर्मृत्युं जयति	सहवै. २३
तत् ह वागदृश्यमानाऽभ्युवाच भो भो प्रजापते त्वमव्यक्ताद्-त्पन्नोऽसि	अव्यक्तो. २
तत् ह वागदृश्यमानाऽभ्युवाच सर्वं बत गौतमो वद	सु. ता. ३।१
तत् ह शिलकः शालावत्यश्चैकि-तायनं दाल्भ्यमुवाच	छान्दो. १।८।६
तत् हाङ्गिरा उद्गीथमुपासाञ्चक्रएव	छान्दो.१।२।१०
तत् हाजातशत्रुरामन्त्रयांचक्रे बृहत्पाण्डरवासः...	कौ.त. ४।१८
तत् हाभिसमेत्योचुर्भगवन्नेधित्वंनः श्रेष्ठोऽसि मोत्क्रमीरिति	छान्दो.५।१।१२
तत् हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्व इत्यहत् ह्यरा ३ इति	छान्दो. ४।१।८
तत् हाभ्युवाद रैकेदं सहस्रं गवामयं निष्कोऽयमश्वतरीरथः	छान्दो. ४।२।४
तत् हासीनं पप्रच्छ गौतमस्य पुत्रास्ते संवृतं लोके	कौ.त. १।१
तत् हासुराः ऋत्वा विदध्वंसुर्यथा-श्मानमाखणमृत्वा विध्वंसेत्	छान्दो. १।२।७

त९ हासुराः पाप्मना विविधुस्तस्मा- त्तेनाभयं जिघ्रति	छान्दो. १।२।२
त९ हास्मै ददौ तं सम्राडेव पूर्वं पप्रच्छ	बृह. ४।३।१
त९ हेन्द्र उवाच न वै वरं परस्मै वृणीते त्वमेव वृणीष्व	कौ.त. ३।१
त९ हैतमतिधन्वा शौनक उदरशा- ण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदयिष्यन्ते..	छांदो. १।९।३
त९ हैतमधिधन्वा शौनकः.. (मा.पा.)	छां.उ. १।९।३
त९ हैतमुद्दालक आरुणिर्वाजसने- याय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाचापि य एन९ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति	बृह. ६।३।७
त९ होवाच (गुरुः) यं वै सोम्यैत- मणिमानं न निभालयस एतस्य वै... महान्यग्रोधस्तिष्ठति	छांदो. ६।१२।२
त९ होवाच (पिता) मृत्यवे त्वां ददामीति	कठो. १।४
त९ होवाच—यदिदमिति द्यावा- पृथिव्योरनारम्भमिव नोप- यन्ति नाभिचक्षते नाभुवन्ति	आर्षे. ३।१
त९ होवाच—विस्फुरन्तीरेवेमा लेलायन्तीव सञ्जिहाना इव..	आर्षे. ७।१
त९ होवाचाजातशत्रुरेतावन्नु बाला ३ इति	कौ.त. ४।१८
त९ होवाचाऽननुशिष्य वाव किल मा भगवानब्रवीदनुत्वाशिषमिति	छान्दो. ५।३।४
ता अनेकधा समभवत्तदेतदोमिति	नारा. ४
ता अन्नमसृजन्त तस्माद्यत्र क च वर्षति तदेव भूयिष्ठमन्नं भवति	छान्दो. ६।२।४
ता अब्रवीद्यथायतनं प्रविशतेति	२ ऐत.२।३
ता अब्रुवन्न वै नोऽयमलमिति	२ऐत. २।२।२
ता अब्रुवन् सुकृतं बतेति, पुरुषो वाव सुकृतम्	२ऐत. २।३
ता अब्रुवन् हन्तास्माच्छरीरा- दुत्क्रामाम...	१ऐत. १।४।३
ता अब्रुवन्हन्तेदं पुनः शरीरं प्रविशाम	१ऐत. १।४।५
ता अभि प्रस्थापयन्नुवाच नासहस्रे- णावर्तेति	छान्दो. ४।४।५
ता अमृता आपस्ता वा एता ऋचः [छान्दो.	३।१।२-३।५।१
ता अश्मैवाप्रबुद्धा अप्राणा स्थाणु- रिव तिष्ठमानाः...	मैत्रा. २।६
ता अहिंसन्ताहमुक्थमस्म्यह- मुक्थमस्मि	१ऐत. १।४।३
ता अहिंसन्ते वाऽहमुक्थमस्म्यह- मुक्थमस्मि	१ऐत. १।४।४
ता आप ऐक्षंत बह्व्यः स्याम प्रजायेयेति	छान्दो. ६।२।४
ता आपः सत्यमसृजन्त	बृह. ५।५।१
ता अब्रवीद्यथायतनं प्रविशतेति	२ऐत. २।३
ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते	छान्दो. ८।६।२
ता इमा आपः, ता एतेनो हिरण्म- यमन्नम्, तत्र चतुर्मुखो ब्रह्मा- ऽजायत	चतुर्वे. १
ता इमादिशः परेण मृत्युमतिक्रान्ताः	बृह. १।३।१५
ता इमाःप्रजाअर्कमभितो निविष्टाः...	१ऐत. १।१।३
ता इमाः प्रतता आपः। ततस्तेजो हिरण्मयमण्डम्	महो. १।४
ता एता आपो वज्रीभूत्वा तानि रक्षांसि मंदेहारुणे द्वीपे प्रक्षिपन्ति	सद्वै. २
ता एता देवताः प्राणापानयोरेव विनष्टाः	१ऐत. ३।३।३
ता एता देवताः सृष्टा अस्मिन्महत्य- र्णवे प्रापतन्	२ऐत. २।१
ता एताः संहिता नानन्तेवासिने प्रब्रूयात्	३ऐत. २।६।४
ता एताः शीर्षञ्छ्रिताः	१ऐत. १।४।३
ता एते नो हिरण्मयमन्नम्	चतुर्वे. १
ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति	२ऐत. २।१
तादृग्रूपो हि पुरुषो...सम्पश्यति यदैवैतत्सद्वस्त्विति विमुह्यति	मुक्तिको. २।५९
तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवति	अद्वयता. ७

तानकृत्स्नविदो मन्दान् भ.गी. ३।२९
तानपरपक्षे न प्रजनयत्येतद्वै
स्वर्गस्य लोकस्य द्वारम् कौ.उ. १।२
तानस्मै प्रददौ हन्तानुपानमित्यु-
च्छिष्टं वै मे पीतᳪ स्यादिति छांदो.१।१०।३
तानहं द्विषतः क्रूरान् भ.गी. १६।१९
तानि चेतनीकर्तुं सोऽकामयत ब्रह्मा-
ण्डब्रह्मरन्ध्राणि समस्तव्यष्टिमस्त-
कान्विदार्य तदेवानुप्राविशत् पैङ्गलो. १।५
तानिधर्माणिप्रथमान्यासन् [महावा.४+ चित्यु. १२।७
[ऋ.अ.८।४।१९=मं.१०।९०।१६ वा.सं.३१।१६
तानिन्द्रः सुपर्णो भूत्वा वायवे प्राय-
च्छत्तान्वायुरात्मनि धित्वा
तत्रागमयद्यत्राश्वमेधयाजिनो-
ऽभवन् बृह. ३।३।२
तानि पञ्च तन्मात्राणि त्रिगुणानि
भवन्ति पैङ्गलो. १।३
तानि भूतानि सूक्ष्माणि पञ्चीकृत्ये-
श्वरस्तदा कठरु. १८
तानि म उपसीदत एव विद्याञ्चक्रुः छाग. ३।२
तानि मृत्युः श्रमो भूत्वोपयेमे,
तान्याप्नोत्, तान्याप्त्वा मृत्यु-
रवारुन्धत् बृह. १।५।२१
तानि यदा गृह्णात्यथ हैतत्पुरुषो
स्वपितिनाम तद्गृहीत एव प्राणो
भवति गृहीता वाग्गृहीतं चक्षु-
र्गृहीतᳪ श्रोत्रं गृहीतं मनः बृह. २।१।१७
तानि वरमवृणीतादित्यो नो योद्धा सह्वै. २
तानि वा एतानि यजूंष्येतं यजुर्वेद-
मभ्यतपत्तस्याभितप्तस्य यश-
स्तेज इन्द्रियं वीर्यमन्नाद्य ᳪ रसो-
ऽजायत छान्दो. ३।२।२
तानि वा एतानि सामान्येत ᳪ
सामवेदमभ्यतपन्.. अजायत छान्दो. ३।३।२
तानि वा एतान्यमृतानाममृतानि
वेदा ह्यमृतास्तेषामेतान्यमृतानि छान्दो. ३।५।४
तानि वा एतान्यवराणि पराᳪ सि
न्यास एवात्यरेचयेद्य एवं वेद महाना. १६।१२
तानि सर्वाणि संयम्य भ. गी. २।६१

तानि सृष्टान्यन्योन्येनास्पर्धन्त बृह. १।५।२१
तानि सृष्टान्यण्डे प्राक्षिक्षिपत् पैङ्गलो. १।५
तानि ह वा इमानि गुणानि पुरुषेणे-
रितानि चक्रमिव चक्रिणा मैत्रा. ३।३
तानि ह वा एतानि चित्तकायनानि
चित्तात्मानि चित्ते प्रतिष्ठितानि छान्दो. ७।५।२
तानि ह वा एतानि त्रीण्यक्षराणि छां.उ.८।३।५
तानि ह वा एतानि द्वाविंशति-
रक्षराणि छां.उ.२।१०।४
तानि ह वैतानिद्वाविंशति...(मा.पा.) छां.उ.२।१०।४
तानि ह वा एतानि रक्षांसि गाय-
त्रियाभिमन्त्रितेनाम्भसा शाम्यन्ति सह्वै. २
तानि ह वा एतानि सङ्कल्पैकाय-
नानि सङ्कल्पात्मकानि सङ्कल्पे
प्रतिष्ठितानि छां.उ. ७।४।२
तानीमानि क्षुद्रमिश्राणि [मा.पा.] छां.उ. ५।१०।८
तानीमानिक्षुद्राण्यसकृदावर्तीनि
भूतानि भवन्ति छां.उ. ५।१०।८
तानेकधा समभवत्... वासुदे. ४
तानोङ्कारेणाग्नीध्रीया देवा असु-
रान्पराभावयन्त २ प्रणवो. ८
तान्वैद्युतान्पुरुषो मानस एत्य
ब्रह्मलोकान्गमयति तेषु.. पराः..
वसन्ति तेषां न पुनरावृत्तिः बृह. ६।२।१५
तान्येकशतᳪ सम्पेदुः छान्दो.८।११।३
तानृषयोऽब्रुवन्—पवित्रं नो ब्रूत,
येनारेपसः स्यामेति सह्वै. ११
तान्वादित्वाऽमुं यज्ञं विततमेयाय छान्दो. ११०;७९
तान्प्रजापतिर्वरेणोपामंत्रयत सह्वै. २
तान्निबोध द्विजोत्तम भ. गी. १।७
तान्दृष्ट्वा (ब्रह्मा) ऽबिभ्यत्
(गणेशं)तं सस्मार गणेशो.३।६
तान् पिष्टान्दधनि मधुनि घृत उप-
षिञ्चत्याज्यस्य जुहोति बृह. ६।३।१३
तान्यभ्यपतत्तेभ्योऽभितप्तेभ्य
ओङ्कारः प्रास्रवत् छान्दो.२।२३।३
तान्यस्यैतानि कर्मनामान्येव बृह. १।४।७
तान्यहं वेद सर्वाणि भ. गी. ४।५

तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके मुण्ड. १।२।१
तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति बृह. १।५।३
तान्याप्त्वा मृत्युरवारुन्धच्छ्राम्यत्येव वाक् श्राम्यति चक्षुः श्राम्यति श्रोत्रम् बृह. १।५।२१
तान्येतान्यनुव्रजन् नाश्रुमापातयेत् कठरु. १
तान्वरिष्ठः प्राण उवाच मा मोहमापद्यथाऽहमेवैत- त्पञ्चधात्मानं प्रविभज्यैतद्बा- णमवष्टभ्य विधारयामि प्रश्नो. २।३
तान्वायुरात्मनि धित्वा तत्रागमयद्य- त्राश्वमेधयाजिनोऽभवन् बृह. ३।३।२
तान्विद्ध्यासुरनिश्चयान् भ. गी. १७।६
तान्वै वेसुतान् पुरुषो मानव एत्य ह (मा.पा.) बृ. उ. ६।२।१५
तान्समीक्ष्य स कौन्तेयः भ. गी. १।२५
तान्सर्वानेवोपसेवेत, वारुणं त्वेव वर्जयेत् छांदो. २।२२।१
तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरंसंवत्स्यथ प्रश्नो. १।२
तान्हासुरः पाप्मा परिजग्राह नृसिंहो. ६।१
तान्होवाच प्रातर्वः प्रतिवक्ताऽस्मीति छान्दो.५।११।७
तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजता- मिति ते ह ब्राह्मणा न दधृषुः बृह. ३।१।२
तान्होवाच यस्मिन्व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठः छान्दो. ५।१।७
तान्होवाचाश्वपतिर्वै भगवन्तोऽयं कैकयः सम्प्रतीममात्मानं वैश्वानर- मध्येति छान्दो.५।११।४
तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्तीति प्रश्नो. ६।७
तान्होवाचेहैव मा प्रातरुपसमीयातेति छान्दो.१।१२।३
तापत्रयं स्वाध्यात्मिकाधिभौतिका- धिदैविकं कर्तृकर्मकार्य- ज्ञातृज्ञानज्ञेय-भोक्तृभोगभोग्यमिति त्रिविधम् मुद्गलो. ४।१
तापनीयोपनिषद्व्यापकशतमेकमेकेन मन्त्रराजाव्यापकेन तत्समं, तद्वा एतत्परमं धाम... नृ.पू. ५।१६
तापसास्तत्र ते द्रुमाः । लोभक्रोधा- दयो दैत्याः कलिकालस्तिरस्कृतः। गोपरूपो हरिः साक्षात्.. कृष्णो. ९
तापसोऽतापसः (भवति) बृह. ४।३।२२
तापापहारिणीं देवीं भुक्तिमुक्तिप्रदा- यिनीम् । अनन्तां विजयां.. देव्यु. १३
ताप्यतापकरूपेण विभातमखिलं जगत् । प्रत्यगात्मतया भाति ज्ञानाद्वेदान्तवाक्यजात् कठरु. ३९
ताभिरेतः रुद्रोऽन्वायत्तः बृह. २।२।२
ताभिः क्षुधं पाप्मानमपाघ्नन् सहवै. १३
ताभिः प्रत्यवसृप्य पुरीतति शेते बृह. २।१।१९
ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति, पुरुषो वाव सुकृतम् २ऐत. २।३
ताभ्यामयं प्राणश्छन्नः बृह. १।६।३
ताभ्यामिदं विश्वमेजत्समेति बृह. ६।२।२
ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति २ऐत. २।२
ताभ्योऽभितप्ताभ्यो मूर्तिरजायत २ऐत. ३।२
ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति २ऐत. २।२
तामग्निवर्णां तपसा ज्वलन्तीं वैरो- चनीं कर्मफलेषु जुष्टाम् देव्यु. ६+
[वनदु. ११५,१६५+ महाना. ६।१४
[ऋ.खि. १०।१२७।१२+ तै.आ.१०।२।१
ताम्प्यथ (चिन्मात्रवासनां) परि- त्यज्य मनोबुद्धिसमन्विताम् । शेषस्थिरसमाधानो भव... मुक्तिको.२।७१
तामसत्वं हर गणेशो. ४।९
तामसं परिचक्षते भ.गी. १७।१३
तामसः परिकीर्तितः भ.गी. १८।७
तामसी चेति तां शृणु भ.गी. १७।२

तामसी दैत्यपक्षेषु माया त्रेधा-
क्षुदाहृता। अजेया वैष्णवी माया.. कृष्णो. ५
तामसी द्रव्यशक्तिः ग.शो. ४।३
तामसी राजसी सात्त्विकी मानुषी..
(मूर्तिः) भक्तियोगे तिष्ठति गोपालो. ३।२
तामस्याः पञ्च तन्मात्रा अजायन्त
पञ्च भूतान्यजायन्त ग.शो.४।४
ता महासंहिता इत्याचक्षते तैत्ति. १।३।१
तामात्मस्थां येऽनुपश्यन्ति धीराः गुह्यका. ४४
तामाहुरग्र्यां महतीं महीयसीम् गुह्यका. ५१
तामिहायुषे शरणं प्रपद्ये ग. पू. २।३
तामीश्वराणां परमां महेश्वरीम् गुह्यका. ६६
तासु नाम्नीरयति नाम्नि मन्त्रा
एकं भवन्ति मन्त्रेषु कर्माणि [छान्दो. ७।४।१+७।५।१
तामेत्य सर्वविद्याज्ञानवान्भवति तारोप. ४
तामेव प्रत्यक्षं तां वदिष्यामि कौलो. शां.
तामेव भान्तीमनुभाति सर्वं गुह्यका. ४९
तामेवमनूचानां गायत्रासिष्ट अव्यक्तो. ३
तामेव विद्धाम्यहम् भ.गी. ७।२१
ता यत्राभिसायं बभूवुस्तत्राग्निमुप-
समाधाय गा उपरुध्य समिधमाधाय
पश्चादग्नेः प्राङुपोपविवेश [छान्दो. ४।६।१–४।८।१
ता यथा तत्र न विदुरियमहमस्मीति छान्दो.६।१०।१
ता यो वेद स वेद ब्रह्म तैत्ति. १।५।३
तारकत्वात्तारको भवति तारसा. २।१
[रामो. ता. १।२+ श्रीवि.ता. १।२
तारकमित्येतत्तारकं ब्राह्मणो नित्यं
महीयते श्रीवि.ता. १।२
तारकं दीर्घानलं बिन्दुपूर्वकं दीर्घा-
नलं.. इत्येतद्ब्रह्मात्मिकाः..
उपासितव्याः रामो. १।२
तारकं द्विविधं—मूर्तितारकममूर्ति-
तारकमिति मं. ब्रा. १।४
तारकं ब्रह्मेति गदितं वन्दे श्री-
रामवैभवम् अद्वयता.शीर्ष.
तारकाभ्यां तद्दर्शनमात्राण्युभयैक-
दृष्टया मनोयुक्तं ध्यायेत् अद्वयता. ६
तारकाभ्यां सूर्यचन्द्रमण्डलदर्शनं
ब्रह्माण्डमिव... अद्वयता. ६
तारकाभ्यां सदूर्ध्वस्थसत्त्वदर्शना-
न्मनोयुक्तेनान्तरीक्षणेन
सच्चिदानन्दस्वरूपं ब्रह्मैव अद्वयता. ६
तारयतीति तारा तारोप. १
ताररहिता पुनरेकजटा भवति तारोप. ५
तारसार-महावाक्य-पञ्चब्रह्मा-
ग्निहोत्रकम् मुक्तिको. १।३८
तारसंयमात्सकलविषयज्ञानं भवति शांडि.१।७।५२
तारं ज्योतिषि संयोज्य...पूर्वा-
भ्यासस्य मार्गोऽयं... शांडि. १।७।१७
तारं परं रमाबीजम् द. मू. १०
तारादिकाद्यान्ता चेत्तारा भवति तारोप. ४
तारा स्यादर्धपञ्चाक्षररूपा ब्रह्म-
विष्णुमहेश्वरसदाशिवबिन्दु-
मेलनरूपा विद्या तारोप. १
तारेण रुद्धं, एतत्तव मनुस्वरूपम् गणप.७
तारेति परमा तारा तारोप. १३
तारे (चित्तसंयमात्) सिद्धदर्शनम् शांडि. १।७।५२
तार्क्ष्यो एतदास्त्रवदास्त्रवति बृह. ४।२।३
तालवनं बृहद्वनं कुमुदवनं...
दधिवनं वृन्दावनमिति सामर. ५
तालुचक्रं, तत्रामृतधाराप्रवाहः सौभाग्य. २९
तालुमूलगतां यत्नाज्जिह्वयाऽऽक्रम्य
घंटिकाम्.. प्राणस्पन्दो निरुध्यते शांडि. १।७।३०
तालुमूलं समुत्कृष्य सप्तवासर-
मात्मवित्। स्वगुरूक्तप्रकारेण
मलं सर्वं विशोधयेत् योगकुं. २।२८
तालुमूले स्थितश्चन्द्रः सुधां वर्षत्यधोमुखः यो.शि. ५।३३
तालुमूलोर्ध्वभागे महाञ्ज्योतिर्मयूखो
वर्तते, तद्योगिभिर्ध्येयम् अद्वयता. ७
तालुमूलोर्ध्वभागे महाज्योतिर्विद्यते
तद्दर्शनादणिमादिसिद्धिः मं.ब्रा. १।४
तालुरसनाग्रनिपीडनाद्वाङ्मनःप्राण-
निरोधनाद्ब्रह्म तर्केण पश्यति मैत्रा. ६।२०
तालुः शंभोर्वाकः (शारीरयज्ञस्य) प्रा.हो. ४।३

तात्वध्यग्रं परिवर्त्य..महिमानं निरीक्षेत मैत्रा. ६।२१
तावताऽऽत्मानमानन्दयति परब्र. २
तावत्कालस्य स्थितिरुच्यते
(ब्रह्मायुःपरिमिता) त्रि.म.ना. ३।४
तावत्संसारभृगुषु स्वात्मना सह
देहिनम्। आन्दोलयति नीरंध्रं.. महो. ४।११३
तावदाकाशसङ्कल्पो यावच्छब्दः
प्रवर्तते ना.बि. ४७
तावज्जीवो भ्रमत्येवं यावत्तत्त्वं
ध्यानं न विन्दति ध्या.बि. ५०
तावदेव निरोद्धव्यं (मनः) यावद्धृदि
गतं क्षयम्। एतज्ज्ञानं च च
शेषोऽन्यो ग्रन्थविस्तरः [ब्र.बिं.५+ त्रि.ता. ५।५
तावदेव निरोद्धव्यं हृदि
यावत्क्षयं गतम्.. मैत्रा. ६।३४
तावद्रथेनगन्तव्यंयावद्रथपथि स्थितः अ. ना. ३
तावद्विचारयेत्प्राज्ञो यावद्विश्रान्ति-
मात्मनि महो. ४।३९
तावानस्य महिमा ततो ज्याया॑श्च
पूरुषः छांदो. ३।१२।६
तावानस्य लोको भवति य
एवं विद्वानधोपहासं चरति बृह. ६।४।३
तावन्ति पुरुषायुषोऽह्नां सहस्राणि
भवन्ति १ऐत. ३।८।६
तावन्ति शतसंवत्सरस्याह्नां सहस्राणि १ऐत. २।४।२
तावन्निशीव वेताला वल्गन्ति हृदि
वासनाः। एकतत्त्वदृढाभ्यासाया-
वन्न विजितंमनः [मुक्तिको.२।४०+ महो.५।७८
तावन्योन्यमभिसम्भवतः १ऐत. ३।७।३
ता वा अस्यैता हिता नाम नाड्यः
यथाकेशः सहस्रधाभिन्नस्तावता-
ऽणिम्ना तिष्ठन्ति.. बृह. ४।३।२०
ता वा एता दशैव भूतमात्रा अधि-
प्रज्ञं दशप्रज्ञामात्रा अधिभूतं यद्धि
भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युः कौ. त. ३।८
ता वा एताश्चतस्रश्चतुर्धा चतस्र-
श्चतस्रो व्याहृतयः। ता यो वेद,
स वेद ब्रह्म तैत्ति. १।५।३

ता वा एताः सर्वा ऋचः सर्वे वेदा
सर्वे घोषा एकैवव्याहृतिः प्राण एव १ ऐत.२।२।११
ता वा एताः सर्वा देवता वायुमेव
प्रविश्य वायौ सृप्ता न मूर्च्छन्ते कौ. त. २।१२
ता वा एताः सर्वा देवताः प्राणमेव
प्रविश्य प्राणे सृप्ता न मूर्च्छन्ते कौ.त. २।१३
तावान् सर्वेषु वेदेषु भ. गी. २।४६
तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मि-
भिरेषोऽस्मिन् प्रतिष्ठितः बृह. ५।५।२
तावेतावर्काश्वमेधौ बृह. १।२।७
तासामु ह स्मैतां चतुर्थीं महाचमस्यः
प्रवेदयते मह इति तद्ब्रह्म तैत्ति. १।५।१
तासां तप्यमानाना॑ रसान्प्रावृह-
दग्ने ऋचो वायोर्यजू॑षि
सामान्यादित्यात् छान्दो.४।१७।२
तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति छान्दो. ६।३।३
तासां त्रिवृतं त्रिवृतमेकैकामकरोत् छान्दो. ६।३।४
तासां ब्रह्म महद्योनिः भ. गी. १४।४
तासां मूर्धानमभिनिस्सृतैका।
तयोर्ध्वमायन्नमृतत्वमेति विष्व-
ङ्ङन्या उत्क्रमणे भवन्ति कठो. ६।१६
तासां (अपां) यः स्थविष्ठो धातु-
स्तन्मूत्रं भवति यो मध्यमस्त-
ल्लोहितं, योऽणिष्ठः स प्राणः छान्दो. ६।५।२
तासां वायुर्वत्सः स य एतमेवं
वायुं दिशां वत्सं वेद न पुत्ररोद॑
रोदिति छान्दो. ३।१५।२
तासां (नाडीनां) शतं शतं
द्वासप्ततिं प्रतिशाखा..(मा.पा.) प्रश्नो. ३।६
तासु चतुर्दशकारणानां बाह्यवृत्तयो-
ऽन्तर्वृत्तयस्तेषामुपादानकारणम् ना. प. ५।१२
तासु तदा भवति, यदा सुप्तः स्वप्नं
न कश्चन पश्यति कौ. त. ४।१९
तासु पूर्णिमाभ्यासः कर्तव्यः,
तल्लक्ष्यं नासाग्रम् मं. ब्रा. २।२
तास्तु गोप्या महायोगात्परमात्म-
पदेऽव्यये। विना कार्यं सदा
गुप्तं योगसिद्धस्य लक्षणम् यो.शि. १।१५६
तां गन्धर्वोऽ (अ)वद्द्भ्रं अन्तः चित्यु. ११।११

तां चेद्विद्वानुदगास्यो मूर्धा ते व्यपविष्यत्तथोक्तस्य मया.. छांदो. १।११।७
तां चेद्विद्वान्प्रति हरिष्यो मूर्धा... छांदो. १।११।९
तां चेद्विद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति छांदो. १।११।४
तां चेद्विद्वान्प्रास्तोष्यो मूर्धा ते व्यपविष्यत् तथोक्तस्य मयेति छांदो. १।११।५
तां जीवरूपिणीं ध्यायेज्ज्योतिष्ठं मुक्तिहेतवे योगरा. ७
तां त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति बृह. ६।२।८
तां दुर्गां दुर्गमां देवीं.. नमामि भवभीतोऽहं देव्यु. १०
तां (कुण्डलिनीं) दृष्ट्वा मनसैव नरः सर्वपापविनाशद्वारा मुक्तो भवति अद्वयता. २
तां देवतामुपातिष्ठत यज्ञकामाः सह्वै. १३
तां द्योतमानां स्वयं मनीषां चित्यु. ११।११
तां (मालां) पञ्चभिर्गन्धैरमृतैः पञ्चभिर्गव्यैस्तनुभिः शोधयित्वा ...प्रत्यक्षमादिक्षान्तैर्वर्णैर्भावयेत् अ.मा. ३
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् [ऋ.खि.५।८७।१ श्रीसू. २,१५
तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मेनश्यतां..[ऋ.खि.५।८७।५ श्रीसू. ५
तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् । अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ कठो. ६।११
तां (ब्रह्मविद्यां) विदित्वा स च रक्तं शिक्षायामास अव्यक्तो. ३
तां वै देवीमात्मबुद्धिप्रकाशां मुमुक्षुर्वै शरणमहं प्रपद्ये.. गुह्यका. ७२
तां (मृदं) शुद्धजलेन प्रणवेन घर्षयेत् कात्याय. १
तां समन्तं पृथिवीं द्विस्तावत्समुद्रः पर्येति बृह. ३।३।२
तां समभवत्ततो मनुष्या अजायन्त बृह. १।४।४
तां समेवाभवत्तत एकशफमजायत बृ.उ. १।४।४
तां समेवाभवत्ततो गावोऽजायन्त बृ.उ. १।४।४
तां समेवाभवत्ततोऽजावयोऽजायन्त बृ.उ.१।४।४
तां सानुमन्तो विद्वत्स्वतेजसा.. वरप्रदाय पित्रे स्वाहा पारमा. ६।५
तां सृष्ट्वाऽध उपास्ते, तस्मात्स्त्रियमध उपासीत बृह. ६।४।२
तां स्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनां स्तत्र भक्षयन्ति बृह. ६।२।१६
तांस्तथैव भजाम्यहम् भ.गी. ४।११
तांस्तितिक्षस्व भारत भ.गी. २।१४
तां स्ते प्रेत्याभिगच्छन्ति, ये के चात्महनो जनाः ईशा. ३
तां स्तेष्वन्वविन्दञ्छ्रद्धयाच तपसाच सह्वै. ११
तां स्त्वं वृत्रहञ्जहि वास्मभ्यमाभर सह्वै. ७
तां ह्यसुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च छान्दो. १।२।३
तां हैतामेके सावित्रीमनुष्टुभमन्वाहुः बृह. ५।१४।५
तां होवाच किमेतद्यक्षमिति केनो. ३।१२
ताः पय आहुतयो देवानामभवन् सह्वै.१३
ताः पुनः पुनरुदयन्: प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनस्येकीभवति प्रश्नो. ४।२
ताः पुनरुदयन्तःप्रचरन्ति..(मा.पा.) प्रश्नो. ४।२
ताःसर्वानाड्यःसुषुम्नयेनाकाशवत् परब्र. १
ताः सृष्टा अब्रुवन् कथमन्नाद्या अभवन्निति ग.पू. १।३
ताः स्मरणादनुमीयन्ते पैङ्गलो. ३।३
तितिक्षाज्ञानवैराग्यशमादिगुणवर्जितः। भिक्षामात्रेण जीवी स्यात्स यतिर्यतिवृत्तिहा ना.प. ५।१२
तिमिरान्धं तामसम् शारीरको. ९
तिरश्चीनमजरं तद्रजोऽभूत् त्रिपुरो. ४
तिरश्ची सा प्रज्ञा, प्रज्ञया हि विपश्यति कौ.त. १।५
तिरोधानकरी पार्वती भवति ना.पू.ता. २।१
तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तताः। सन्तापयति स्वं देहमापादतलमस्तकः महाना. ९।१०
तिर्यगूर्ध्वमधोदृष्टिं विहाय च महामतिः। स्थिरस्थायी विनिष्कम्पः सदा योगं समभ्यसेत् अ.ना. ३२

(अथ) तिर्यग्वाऽवाङ्गूर्ध्वं वाऽनूह्य एष परमात्माऽपरिमितोऽजोऽतर्क्योऽचिन्त्य एष आकाश आत्मा मैत्रा. ६।१७

तिलमध्ये यथा तैलं पाषाणेष्विव काञ्चनम् । हृदि स्थाने स्थितं पद्मंतस्यवक्त्रमधोमुखम् [योगत.८ यो.त. १३७

तिलाञ्जलिं पितॄणां ये ददति ते सन्मण्डलं प्राप्नुवन्ति सामर. ७५

तिलाञ्जुहोमि । सरसा९ सपिष्टान् गन्धार मम चित्ते रमन्तु स्वाहा महाना. १४।५

तिलानां तु (तिलेषुच) यथा तैलं पुष्पे गन्ध इवाश्रितः । पुरुषस्य शरीरेऽस्मिन् (तु) सबाह्याभ्यन्तरे (तथा) स्थितः [ध्या.बिं. ७+ ब्र.वि. ३५

तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः । तिलाः पुनन्तु मे पापं यत्किञ्चिद्दुरितं मयि महाना. १४।६

तिलेषु तिलवद्वेदे वेदान्तः सुप्रतिष्ठितः मुक्तिको. १।९

तिलेषु तैलं दधनीव सर्पिरापः स्रोतस्स्वरणीषु चाग्निः । एवमात्मनि जायते (गृह्यते) ऽसौ सत्येन (एनं) तपसा योऽनुपश्यति [ब्रह्मो. १९+ श्वेता. १।१५

तिलेषु तैलं दधनीव सर्पिर्यदापः स्रोतस्स्वरण्योरिवाग्निः । एवमात्माऽऽत्मनि जायते इतिहा. ४९

तिलैरेतावद्भिरभिषिच्य वायुलोककामो वायुलोकमवाप्नोति भस्मजा. २।१२

तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै बृह. ६।४।१७

तिष्ठतो व्रजतो वाऽपि यस्य चक्षुर्न दूरगम् । चतुर्युगां भुवं मुक्त्वा परिव्राट् सोऽन्ध उच्यते ना.प. ३।६६

तिष्ठत्यात्मरसं मनः अ.पू. २।९

तिष्ठन्गच्छन् स्पृशञ्जिघ्रन्नपि तल्लेपवर्जितः । अजडो गलितानन्दस्त्यक्तसंवेदनः सुखी अ.पू.४।६३

तिष्ठन्गच्छन्स्वपञ्जाग्रन्निवसन्नुत्पतन्पतन् । असदेवेदमित्यन्तं निश्चित्यास्थां परित्यज महो. ६।३४

तिष्ठन्ति परितस्तस्या नाड्यो मुनिपुङ्गव । द्विसप्तति सहस्राणि तासां मुख्याश्चतुर्दश जा.द. ४।६

तिष्ठन्तं परमेश्वरम् भ.गी. १३।२८

तिष्ठन्त्यहश्च शेषो भवति व्रतमिति.. संहितो. ५।१

तिष्ठन्नपि हि नासीनो गच्छन्नपि न गच्छति । शान्तोऽपि व्यवहारस्थः कुर्वन्नपि न लिप्यते सं.सो. २।३३

तिष्ठन्प्रातः प्राङ्मुख आयातु वरदे- त्यावाह्य... महाव्याहृतिभिः.. गायत्रीं जपेत् सन्ध्यो. २

तिसृभिरुयायुषैस्त्र्यम्बकैस्तिस्रो रेखाः कुर्वीत (भस्मना) जाबाल्यु. ६

तिस्रश्च रेखाः सदनानि भूमेस्त्रिविष्टपास्त्रिगुणास्त्रिप्रकाशाः । एतत्पुरं पूरक पूरणानाम्.. त्रि.महो. ५

तिस्रस्तृचाशीतयो यदूर्ध्वं सा पञ्चमी १ ऐत. ३।४।३

(ॐ)तिस्रः पुरस्त्रिपथा विश्वचर्षणा त्रिपुरो. १

तिस्रः पुरस्त्रिपथा विश्वचर्षणी त्रि.महो. १

तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनुविप्रयुक्ताः । क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः प्रश्नो. ५।६

तिस्रो मात्रार्धमात्रा च प्रत्यक्षस्य शिवस्य च १प्रणवो. ३

तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्निरूपिणः ब्र.वि. ८

तिस्रो रात्रीर्दीक्षितो भवति सहवै. १२

तिस्रोरात्रीर्यदवात्सीर्गृहेमेऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः । नमस्तेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व कठो. १।९

तिस्रो रेखाः सदनानि भूस्त्रिविष्टपास्त्रिगुणास्त्रिप्रकाराः । एतत्त्रयं पूरकं पूरणानाम् त्रिपुरो. ५

तिस्रो व्याहृतयस्त्रिपदा गायत्री त्रयो वेदास्त्रयो देवास्त्रयो वर्णास्त्रयोऽग्नयश्च जायन्ते शाडि. ३।१।३
तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति बृह. ४।३।२२
तीर्थदानतपोयागस्वाध्याया नैव तत्समाः (बिल्वसमाः) २ बिल्वो. २९
तीर्थभ्रान्त्यधमाधमा मैत्रे. २।२१
तीर्थानि तोयपूर्णानि देवान्काष्ठादिनिर्मितान्। योगिनो न प्रपद्यन्ते (प्रपूज्यन्ते)स्वात्मप्रत्ययकारणात् जा.द. ४।५२
तीर्थानि यानि पञ्चैते...प्राणायामस्य तत्फलम् योगो. १४
तीर्थे दाने जपे यज्ञे काष्ठे पाषाणके सदा। शिवं पश्यति मूढात्मा शिवे देहे प्रतिष्ठिते जा.द. ४।५७
तीर्थे श्वपचगृहे वा तनु विहाय याति कैवल्यम् (ज्ञानी) पैङ्गलो. ४।५
तुन्दस्थजलमन्नं च रसादीनि समीकृतम्। तुन्दमध्यगतः प्राणस्तानि कुर्यात्पृथक्पृथक् त्रि. ब्रा. २।८३
तुन्दस्थं जलमन्नं च रसादिषु समीरितं तुन्दमध्यगतः प्राणस्तानि पृथक्कुर्यात् शाडि. १।४।८
तुन्दे तु ताणं कुर्याच्च कण्ठसङ्कोचने कृते। सरस्वत्यां चालनेन वक्षसश्चोर्ध्वगो मरुत् यो.कुं. १।१५
तुभ्यं प्राणः प्रजास्त्विमा बलिं हरन्ति... यः प्राणैः प्रतितिष्ठसि प्रश्नो. २।७
तुभ्यं मह्यमनन्ताय मह्यं तुभ्यं चिदात्मने (नमः) [वराहो.२।३४ +सं.सो. २।३२
तुमुलो व्यनुनादयन् भ.गी. १।१९
'तुरंभगस्यधीमहि'[ऋ.अ. ४।४।२।५ [मं=५।८२।१तै.आ. १।११।३इति सर्वं पिबति छान्दो.५।२।७
(अथ) तुरीय ईश्वरग्रासः स स्वराट् स्वयमीश्वरः नृसिंहो. २।७
तुरीयगा सप्तमी (भूमिका) वराहो. ४।१
तुरीयपादस्तुरीयतुरीयंतुरीयातीतं च त्रि.म.ना. १।४
तुरीयपादस्तुरीयः (ब्राह्मणः पादः) त्रि.म.ना. १।४
तुरीयभूम्यां विहरन्ब्रह्मविद्भवति वराहो. ४।१
तुरीयमक्षरमिति श्रुतेः, तुरीयस्य नित्यत्वं.. त्रि.म.ना. २।१
तुरीयमक्षरे साक्षात्तुरीयं सर्वं सर्वान्तर्भूतम् त्रि.ता. १।७
तुरीयमात्राचतुष्टयमर्धमात्रांशम्, अयमेव ब्रह्मप्रणवः प.हं.प. १०
तुरीयमेवाप्येति यस्तुरीयमेवास्तमेति सुबालो.९।१,१३
तुरीयरूपां तुरीयातीतां... हिरण्यवर्णामिति पञ्चदशर्भिर्ध्यायेत् सौ.ल. १
(अथ) तुरीयश्चतुरात्मा तुरीयावसितत्वादेकैकस्योतानुज्ञात्रनुज्ञाविकल्पैस्त्रयमप्यत्रापि सुषुप्तं स्वप्नं मायामात्रम् नृसिंहो. १।४
तुरीयं तु निराकारम् त्रि.म.ना. २।१
तुरीयं निराकारमेकं ब्रह्म त्रि.म.ना. १।३
तुरीयं पदमक्षरम् ब्रह्मो. १
तुरीयं(सत्यचित्सुखम्)ब्रह्मसंज्ञितम् पं.ब्र. १३
तुरीयःपरमोहंसःसाक्षान्नारायणोयतिः ना.प. ४।१४
तुरीयाक्षरमीकारं पदानां मध्यवर्ती स्यैवं व्याख्यातम् त्रि. ता. १।७
तुरीयातीतमवाच्यं.. निराकारं निराश्रयं निरतिशयाद्वैतपरमानन्दलक्षणमादिनारायणं ध्यायेत् त्रि.म.ना.७।१२
तुरीयातीतरूपात्मा शुभाशुभविवर्जितः ते.बिं. ४।४९
तुरीयातीतरूपोऽहं निर्विकल्पस्वरूपवान् ते.बिं. ३।४१
तुरीयातीतसन्न्यासपरिव्राजाक्षमालिका मुक्तिको. १।३६
तुरीयातीतस्यावधूतस्याजगरवृत्तिः ना.प. ५।७
तुरीयातीतावधूतयोर्ऋतुक्षौरं, कुटीचकस्य ऋतुद्वयक्षौरं बहूदकस्य न क्षौरं हंसस्य परमहंसस्य च न क्षौरम् ना.प. ७।६
तुरीयातीतावधूतयोर्न ज्येष्ठः, यो न स्वरूपज्ञः, स ज्येष्ठोऽपि कनिष्ठः ना.प. ५।८
तुरीयातीतावधूतयोर्नत्वन्याधिकारः ना.प. ७।९
तुरीयातीतावधूतयोर्निदिध्यासः ना. प. ७।११

तुरीयातीतावधूतयोर्ब्रह्मप्रणवः — ना.प. ७।१०

तुरीयातीतावधूतयोर्महावाक्योपदेशाधिकारः, परमहंसस्यापि — ना.प. ७।९

तुरीयातीतावधूतयोः सोऽहम्भावना — ना.प. ७।९

तुरीयातीतावधूतयोः स्वात्मन्येव कैवल्यं स्वरूपानुसन्धानेन भ्रमरकीटन्यायवत् [सं. सो. २।५९+ — ना. प. ५।९

तुरीयातीतावधूतवेषेणाद्वैतनिष्ठापरः प्रणवात्मकेन देहत्यागं करोति यः सोऽवधूतः — तुरीया. ३

तुरीयातीतो गोमुखवृत्त्या फलाहारी अन्नाहारी चेद्गृहत्रये देहमात्रावशिष्टो दिगम्बरः कुणपवच्छरीरवृत्तिकः — सं. सो. २।१३

तुरीयातीतो गोमुखः फलाहारी — ना. प. ५।५

तुरीयातीतोपनिषद्ब्रह्म यत्परमाक्षरम्.. ...स्वमात्रं चिन्तयेऽन्वहम् — तुरी..शीर्षकं

तुरीयावस्थायां तुरीयस्य चातुर्विध्यं तुरीयविश्वस्तुरीयतैजसस्तुरीयप्राज्ञस्तुरीयतुरीय इति — प. हं. प. ९

तुरीयावस्थां प्राप्य तुरीयातीतत्वं व्रजेत् — ना. प. ६।२

तुरीये जाग्रतमस्वप्नमसुषुप्तमव्यभिचारिणं नित्यानन्दं सदेकरसं — नृसिंहो. २।१

(अथ) तुरीयेणोतश्च प्रोतश्च ह्ययमात्मा नृसिंहः — नृसिंहो. ८।१

तुरीयेतुरीयादिचतस्रोऽवस्थाः[प.हं.प.९ ना. प. ६।७

तुर्यतुर्यः परानन्दो वैदेही मुक्त एव सः — ते. बिं ४।४८

तुर्यमालम्ब्य कायान्तस्तिष्ठामि स्तम्भितस्थितिः — अ. पू. ३।१३

तुर्यविश्रान्तियुक्तस्य...नाकृतेन कृतेनार्थो ... निर्मन्दर इवाम्भोधिः स तिष्ठति — महो.४।४०,४१

तुर्यं ध्वन्यात्मकं तुरीयातीतमवाच्यं ...ध्यायेत् (आदिनारायणम्) — त्रि.म.ना.७।३२

तुर्यातीतपदावस्था सप्तमी भूमिकोत्तमा । मनोवचोभिरग्राह्या स्वप्रकाशसदात्मिका — अ.पू.५।८९

तुर्यातीता तु याऽवस्था परा निर्वाणरूपिणी — अ.पू. ५।८६

तुर्यातीतं न मे किञ्चित् सर्वं सच्चिन्मयं ततम् — ते. बिं. ६।९

तुर्यातीतं परं ब्रह्म ब्रह्मरन्ध्रे तु लक्षयेत । जाग्रद्वृत्तिं समारभ्य यावद्ब्रह्मबिलान्तरम् — त्रि.ब्रा.२।१५१

तुर्यातीतोऽस्मि केवलः । सदाचैतन्यरूपोऽस्मि चिदानन्दमयोऽस्म्यहम् — ते.बिं. ३।४

तुर्यान्ते विष्णुरुच्यते । ध्यानेनैव समारूढो व्योम्नि चात्यन्तनिर्मले — त्रि.ब्रा. २।१५२

तुर्यावस्था नमस्कारः — भावनो. १०

तुर्यावस्थोपशान्ता सा मुक्तिरेव हि केवला — अ.पू. ५।८५

तुर्या सा प्राप्यते दृष्टिर्महद्भिर्वेदवित्तमः — अ.पू. १।५१

तुर्यां तुरीयविश्वो मध्यमायां तुरीयतैजसः पश्यन्त्यां तुरीयप्राज्ञः परायां तुरीयतुरीयः — प.हं.प. १०

तुलसि श्रीसखि शुभे...नारायणमनःप्रिये — तुलस्यु. १०

तुलसीदारुमणिभिर्जपः सर्वार्थसाधकः — तुलस्यु. १७

तुलसीपत्रमुत्सृज्य यदि पूजां करोति वै ।..विष्णुप्रीतिकरी न च — तुलस्यु. १५

तुलसीपारिजातश्रीवृक्षमूलादिकस्थले । पद्माक्ष..मालया..जपेदक्षरलक्षकं — रामर. ४।६

तुल्यनिन्दात्मसंस्तुतिः — भ.गी. १४।२४

तुल्यनिन्दास्तुतिर्मौनी — भ.गी. १२।१९

तुल्यप्रियाप्रियो धीरः — भ.गी. १४।२४

तुल्यातुल्यविहीनोऽस्मि नित्यः शुद्धः सदाशिवः — मैत्रे. ३।६

तुल्ये सत्यपि कर्तव्ये वरं कर्म कृतं परम् — शिवो. ७।१२६

तुल्यो मित्रारिपक्षयोः — भ.गी. १४।२५

तुषारकरबिम्बाच्छं मनो यस्य निराकुलम् । मरणोत्सवयुद्धेषु स शान्त इति कथ्यते — महो. ४।३३

तुषेण बद्धो व्रीहिः स्यात्तुषाभावेन तण्डुलः । एवं बद्धस्तथा जीवः कर्मनाशे सदाशिवः — स्कन्दो. ६

तुष्टिस्त्वतुष्टिपर्यन्ता तस्माद्वाञ्छां परित्यज अ.पू. ५।३७
तुष्टो यच्छेद्वाञ्छितार्थं महेशः सि. शि. २५
तुष्यन्ति च रमन्ति च भ. गी. १०।९
तूष्णीं शूद्रमजनयत्तस्माच्छूद्रो निर्विद्योऽभवत् अव्यक्तो. ६
तुस्तूर्षमाणोदक्षिणश्चोत्तरश्च न हैवैनं स्तृण्वीयाताम् कौ. त. २।१३
तृणकाष्ठादिगहने.. स्थाने न दीपयेदग्निं दीप्तं चापि ततः क्षिपेत् शिवो. ७।७०
तृणं पांसुं महेन्द्रं च सुवर्णं मेरु-सर्षपम्। आत्मम्भरितया सर्वमात्मसात्कर्तुमुद्यतः। कालोऽयं सर्वसंहारी तेनाक्रान्तं जगत्.. महो. ३।३८
तृणाग्रेष्वम्बरे भानौ नरनागामरेषु च। यत्तिष्ठति तदेवाहमिति मत्वा न शोचति अ. पू. ५।९४
तृणानलश्च नित्यश्चेत् क्षणिकं तज्जगद्भवेत् ते. बिं. ६।८७
तृणानि ह्रीच्छन्ति कुशत्वमेव वृक्षा यूपत्वं पशोश्च गोत्वम्। सर्वाः प्रजा ब्राह्मणत्वं.. न ब्राह्मणत्वात् परमस्ति किञ्चित् इतिहा. १४
तृणेन तत्तज्जीवानां सूर्यादि-सकलभुवनप्रकाशिनी दिवा च रात्रिः (तृप्तिकर्त्री) सीतो. ७
तृणोदकं पशुभ्यः स्वर्गं लोकं यज-मानायान्नमात्मन आगायानि.. छान्दो.२।२२।२
तृतीयसवनमनुसन्तनुत छान्दो.३।१६।४
तृतीयस्तैजसो भवति (नारायणः) ना. पू. ता.१।१
तृतीयं तृतीयेन (संयुज्यते) नृ. पू. २।२
तृतीयं नाभिचक्रं स्यात्तन्मध्ये तु जगत्स्थितम् योगरा. ९
तृतीयं नाभिचक्रं पञ्चावर्तं सर्पकुटिलाकारम् सौभाग्य. २६
तृतीयं यः पिबेत् सामवेदः प्रीणातु आचम. ४
तृतीयं सर्वमनु सन्तनुते –(मा पा.) छां.उ.३।१६।४
तृतीया ईकाररूपिणी अव्यक्त-स्वरूपा भवतीति सीतेत्युदाहरंति सीतो. ३
तृतीया तनुमानसी (ज्ञानभूमिः) महो. ५।२४
तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्र आदित्या जगत्या-हवनीयः सा साम्नस्तृतीयः पादो भवति नृ. पू. २।१
तृतीया द्यौः स मकारः, स सामभिः सामवेदो रुद्रा आदित्या जगत्याहवनीयः अ. शिखो. १
तृतीया शुभाशुभा शुक्ला रुद्रदेवत्या अ. शिखो. १
तृतीया (मोक्षभूमिका) साङ्गभावना अ. पू. ५।८२
तृतीयां (वृक्षशाखां) जहात्यथ सा शुष्यति, सर्वं जहाति सर्वं शुष्यति छांदो.६।११।२
तृतीयां भूमिकां प्राप्य बुद्धो-ऽनुभवति स्वयम् अक्ष्युप. २२
तृतीये उत्तराम्नायो ज्योतिर्मठः... मठाम्ना. ५
तृतीयेनतुपिण्डेनमातस्तस्याभिजायते पिण्डो. ५
तृतीये धामनि पूर्वस्या एव विद्याया यद्वाग्भवकूटं तेनैव मानवीं चान्द्रीं कौबेरीं विद्यामाचक्षते त्रि. ता. १।१६
तृतीयाऽत्यन्तमात्मानमाचार्यकुले-ऽवसादयन् (धर्मस्कन्धः) छांदो. २।२३।१
तृप्तिरिति वृष्टौ, बलमिति विद्युति तैत्ति. ३।१०।२
तृष्णया बध्यते जन्तुः सिंहः शृङ्खलया यथा महो. ५।८७
तृष्णा क्रोधोऽनृतं माया... प्रतिषिद्धानि (२०) चैतानि सेव-मानो व्रजेदधः ना. प. ४।५-७
तृष्णाग्राहगृहीतानां संसारार्णव-पातिनाम्। आवर्तैरूह्यमानानां दूरं स्वमन एव नौः महो. ४।१०६
तृष्णा चपलमर्कटी, क्षणमायाति पातालम् महो. ३।२३
तृष्णा च सुखदुःखानां कारणम् आयुर्वे. ६
तृष्णारज्जुगणं छित्वा मच्छरीर-कपञ्जरात्। न जाने क गतो-ड्डीय निरहङ्कारपक्षिणी सं. सो. २।३८

तृष्णाविषूचिकामन्त्रश्चिन्तात्यागो हि सद्द्विज । स्तोकेनानन्दमायाति स्तोकेनायाति खेदताम्	महो. ३।२६
तृष्णासङ्गसमुद्भवम्	भ. गी. १४।७
तृष्णा हृत्पद्मषट्पदी	महो. ३।२४
तृष्णैका दीर्घदुःखदा । अन्तः-पुरस्थमपि या योजयत्यतिसङ्कटे	महो. ३।२५
तृष्णा स्नेहो रागो लोभो हिंसा रतिः ...चञ्चलत्वं जिहीर्षार्थोपार्जनं ...परिग्रहावलम्बोऽनिष्टेष्विन्द्रियार्थेषु द्विष्टिरिष्टेष्वभिष्वङ्गपरिपूर्ण एत...इत्ययंभूतात्मा तस्मान्नानारूपाण्याप्नोति	मैत्रा. ३।५
ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति	२ऐत. २।५
ते अस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते तेजस आत्मा भवति	कौ.त. ४।४
ते उभे नानार्थे पुरुषँ सिनीतः	कठो. २।१
ते कामक्रोधादयः ..साधनरूपा भवन्ति	सामर.१०१
ते क्षुद्रसूक्ताश्चाभवन्महासूक्ताश्च...	१ऐत. २।२।५
ते खल्विम एव पूर्वैराचार्यैः प्रोक्ता धर्माः	संहितो. ३।९
तेऽग्निमब्रुवन्, जातवेद एतद्विजानीहि किमेतद्यक्षमिति	केनो. ३।३
ते क्रमेण षोडशमात्रारूढाः, अकारे जाग्रद्विश्वः, उकारे जाग्रत्तैजसः .	प. हं. प. १९
ते चन्द्रं प्राप्यान्नं भवन्ति	बृह. ६।२।१६
ते चान्द्रमसमेव लोकमभिजयन्ते	प्रश्नो. १।९
ते चावस्थं विमुच्यन्ते यावत्कर्म न तद्भवेत्	शिवो. १-३४
ते छन्दोभिरच्छादयन्यदेभिरच्छादयन्स्तच्छन्दसां छन्दस्त्वम्	छां. उ. १।४।२
ते छन्दोभिराच्छादयन्यदभिराच्छादयन्– (मा. पा.)	छां. उ. १।४।२
तेज एव तत्पूर्वं दर्शयित्वाऽथापः सृजते [छांदो.	७।११।१,१
तेजश्च तेजोमात्रा च	प्रश्नो. ४।८
तेजश्च विद्योतयितव्यं च	प्रश्नो. ४।८
तेजश्चास्मि विभावसौ	भ. गी. ७।९
तेजस एव तद्ध्यापो जायन्ते	छान्दो. ६।२।३
तेजसः समृद्ध्यै पुण्यलोकविजित्यर्थायामृतत्वाय च (यष्टव्यम्)	मैत्रा. ६।३६
तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति	छान्दो. ६।६।४
तेजसात्याप्ताखिललोकं ब्रह्ममूर्धानं ब्रह्मादयो हीदं दृष्ट्वाऽस्तुवन्	गणेशो. ४।८
तेजसा शरीरत्रयं संव्याप्य.. मात्राभिरोतानुज्ञात्रनुज्ञाविकल्परूपं चिन्तयन्ग्रसेत्	नृसिंहो. ३।४
तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ, सन्मूलाः सोम्येमाः सर्वाः प्रजाः	छान्दो. ६।८।४
तेजसा हि तदा सम्पन्नो भवति	छान्दो. ८।६।३
तेजसां तेजस्तेज आदधानः... तेजस्तेजसे स्वाहा	पारमा. ४।४
तेजसीव तमो यत्र विलीनं भ्रान्तिकारणम् । अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः	अध्यात्मो. २४
तेजसो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीतु	छांदो. ७।११।२
तेजस्कायममृतं सलिल एवेदं सलिलं वनं भूयस्तेनैव मार्गेण जाग्राय धावति सम्राट्	सुबालो. ४।४
तेजस्तल्लोहितस्यात्र पिण्ड एवोभयोस्तयोः	मैत्रा. ७।११
तेजस्तेजस्विनामहम् [भ.गी.७।१०	+७।३६
तेजस्त्रयमकारोकारमकारप्रणवात्मकम्	२ बिल्वो.२१
तेजस्यन्नादो भवति (मा. पा.)	छां.उ.३।१२।१
तेजस्विनी ह्यस्य प्रजा भवति	बृह. २।१।४
तेजस्वी भूयासम्	चित्यु. ७।४
तेजस्वी वै स तेजस्वतो लोकान् भास्वतोऽपहततमस्कानभिसिद्ध्यति	छांदो.७।११।२
तेजस्व्यन्नादो भवति [छान्दो.२।१४।२+	३।१३।१
तेजः कल्पोधानम्	भावनो. २
तेजः क्षमा धृतिः शौचं	भ.गी.१६।३
तेजःक्षये क्षुधाकान्तिर्नश्यते मारुतक्षये	वराहो.५।५

तेजः प्रकाशने (शरीरस्य) — गर्भो. १
तेजः परस्यां देवतायाम् — छान्दो. ६।८।६
ते जीवा भक्तिमार्गीया एवैते — सामर. २
तेजोदास्त्वमस्यग्निरसि — महाना. १७।१५
तेजो-नाद-ध्यान-विद्या-योग-तत्त्वात्मबोधकम् — मुक्ति. १।३३
तेजोबिन्दुः परं ध्यानं विश्वात्महृदि संस्थितम् । आणवं शांभवं शांतं स्थूलं सूक्ष्मं परं च यत् — ते.बि. १।१
तेजो भित्त्वा वायुं भिनत्ति — सुबालो. ११।२
तेजोभिरापूर्य जगत् समग्रं — भ.गी. ११।३०
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः — मैत्रा. ६।३८
तेजोमयं (यी) चिदस्ति — सामर. ९७
तेजोमयं विश्वमनन्तमाद्यं — भ.गी. ११।४७
तेजोमयी वागिति तद्धास्य विजिज्ञौ — छांदो. ६।७।६
तेजोमयी वागिति भूय एवमा भगवान्विज्ञापयतु [छांदो. — ६।५।४+५।६
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ..सोऽहमस्मि — ईशा. १६
तेजोरसविमेदैस्तु वृत्तमेतच्चराचरम् — बृ.जा. २।४
तेजोराशिं सर्वतो दीप्तिमन्तं — भ.गी. ११।१७
तेजो वायौ विलीयते, वायुराकाशे.. — सुबालो. २।२
तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायुमागृह्याकाशमभितपति — छांदो. ७।११।१
तेजो वै पुत्रनामासि स जीव शरदः शतम् — कौ.त. २।११
तेजोऽशितं त्रेधा विधीयते तस्य यःस्थविष्ठो धातुस्तदस्थि भवति, यो मध्यमः स मज्जा, योऽणिष्ठः सा वाक् — छां.उ.६।५।३
तेजोह्वावउदानस्तस्मादुपशांततेजाः — प्रश्नो. ३।९
ते तत एव द्रागिव व्यज्ञासिषुः — छाग. ६।४
ते (अज्ञाः)तत्र साभिमाना वर्तन्ते — स्वसंवे. ३
ते तथेत्युक्त्वा तूष्णीमतिष्ठन् ...नीचैर्बभूवुः — २प्रणवो. १९
तेत्वमर्चयन्तस्त्वंहिनःपिता,योऽस्माकमविद्यायाः परं पारं तारयसि — प्रश्नो. ६।८
ते तं भुक्त्वा स्वर्गलोकं विशालं — भ.गी. ९।२१

ते तेषु ब्रह्मलोकेषु पराः परावते वसन्ति न तेषां पुनरावृत्तिः — बृह. ६।२।१५
तेऽथ (ऋषयः) कवषमैलूषं दास्याः पुत्र इति... — छाग. १।१
ते देवा अब्रुवन्नेतावद्वा इदꣳ सर्वं यदन्नं तदात्मन आगासीः — बृह. १।३।१८
ते देवा इममात्मानं ज्ञातुमैच्छन्, ताꣳ हासुरः पाप्मा परिजग्राह — नृसिंहो. ६।१
ते देवा ऊर्ध्वबाहवो रुद्रं स्तुवन्ति — चतुर्वे. ८
ते देवा ज्योतिरुत्तितीर्षवो द्वितीयाद्भयमेव पश्यन्त इममेवोकाराप्रविद्योतं तुरीयतुरीयमात्मानमनुष्टुभान्विष्य प्रणवेनैव तस्मिन्नवस्थिताः — नृसिंहो. ६।२
ते देवा देवयजनस्योत्तरार्धेऽसुरैः संयत्ता आसन् — २ प्रणवो. ८
ते देवा भावयन्तु वः — भ. गी. ३।११
ते देवा भीता आसन्, क इमानसुरान्हनिष्यतीति — २ प्रणवो. ७
ते देवाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च ससाधने व्युत्थाय ...प्रणवमेवैभ्यो परं ब्रह्मात्मप्रकाशं शून्यं जानन्तस्तत्रैव परिसमाप्ताः — नृ. उ. ६।३
ते देवाः सत्यमेवोपासते — बृह. ५।५।१
ते द्वन्द्वमोहनिर्मुक्ताः — भ. गी. ७।२८
ते द्वे ब्रह्माणि विन्देत कर्तृताकर्तृते मुने । यत्रैवैष चमत्कारस्तमाश्रित्य स्थिरो भव — महो. ४।१५
ते द्वे योनिस्तदेकं मिथुनम् — सावित्र्यु. १।९
ते द्वे शाखे हंसवर्णे गायत्री त्रिष्टुब्दैवत्ये — नारदो. १
ते द्वे शाखे हंसवर्णे गायत्री त्रिष्टुप्छन्दसी — कात्याय. १
ते धर्माःस्कन्दनन्दिभ्यामन्यैश्च मुनिसत्तमैः । सारमादाय निर्दिष्टाः सम्यक्.. — शिवो. १।७
तेधूममभिसम्भवन्ति धूमाद्रात्रिꣳ रात्रेरपरपक्षमपरपक्षाद्यान्षड् दक्षिणैति — छां.उ.५।१०।३

ते धूममभिसम्भवन्ति धूमाद्रात्रिꣳ रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति बृ. उ. ६।२।१६
ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् [श्वेताश्व. १।३+ ना. प. ५।२
तेन क्रूरोऽमृतेनाहमस्मि चित्त्यु. ११।४
तेन गन्धमाल्यलोकेन सम्पन्नो महीयते छान्दो. ८।२।६
तेन गीतवादित्रलोकेन सम्पन्नो महीयते छांदो. ८।२।८
तेन चित्प्रतिबिम्बेन त्रिविधा भाति सा पुनः । प्रकृत्यवच्छिन्नतया सरस्व. ३७
तेन चेतनेनेदं शरीरं चेतनवत्प्रतिष्ठापितम् मैत्रा. २।५
तेन ततोऽपि न बहु ददृशे तेनैवꣳ सोम्य ते षोडशानां कलानामेका कला.. छान्दो. ६।७।३
तेन तर्ह्येष पुरुषो न शृणोति न पश्यति स्वपितीत्याचक्षते प्रश्नो. ४।२
तेन तꣳह बको दाल्भ्यो विदांचकार छांदो. १।२।१३
तेन तꣳह बृहस्पतिरुद्गीथमुपासांचक्रे छांदो. १।२।११
तेन तꣳ हायास्य उद्गीथमुपासांचक्रे छांदो. १।२।१२
तेन त्रिराचामेत् । प्रथमं यः पिबेद्दृग्वेदः प्रीणातु आचम. ३
तेनदेवाऽअयजन्तसाध्याऋषयश्चये [ऋ.अ. ८।४।१८ =तै.१०।९०।७ [वा.सं. ३१।९+ चित्त्यु. १२।४
तेन देवाधिपत्यं ब्रह्माधिपत्यं च गच्छति ग.पू. १।१२
तेन देवाधिपत्यं स्वःपतित्वं च गच्छति ग.पू. १।१२
तेन धनदादिकाष्ठापतिर्भवति ग.पू. १।१२
तेन धीराअपि यन्ति ब्रह्मविदः बृह. ४।४।८
तेन नवरन्ध्ररूपो देहः भावनो. २
तेन निर्यानिवृत्तः (परमहंसः) प.हं. ३
तेन नो णकारषकारावुपाप्ताविति ह स्माह ह्रस्वो माण्डूकेयः ३ ऐत. २।६।२
तेन नो णकारषकारावुपाप्ताविति ह स्माह स्थविरः शाकल्यः ३ऐत. २।६।३
तेऽनन्योपासका भवन्ति सामर. ७५
तेन पाप्मानमपहत्य ब्रह्मणा स्वर्गं लोकमप्येति १ऐत. ३।८।४
तेन पितृलोकेन सम्पन्नो महीयते छांदो. ८।२।१
तेन प्रद्योतेनैष आत्मा निष्क्रामति बृह. ४।४।२
तेन प्राच्यान्प्राणान्रश्मिषु सन्निधत्ते प्रश्नो. १।६
तेन भ्रातृलोकेन सम्पन्नो महीयते छांदो. ८।२।३
तेन मनुष्याणां मोहको दाहको(वायुः) भक्ष्य-भोज्य-लेह्य-चोष्य-पेयात्मकं चतुर्विधमन्नं पाचयति भावनो. ९
तेन मातृलोकेन सम्पन्नो महीयते छान्दो. ८।२।२
तेन मुखेन पक्षिणोऽत्सि (चन्द्रोपस्थानम्) कौ. उ. २।९
तेन मुखेन मामन्नादं कुरु । राजा त एकं मुखम्
तेन मुखेन विशोऽत्सि कौ. उ. २।९
तेन मुखेनेमं लोकमत्सि कौ. उ. २।९
तेन मुखेन सर्वाणि भूतान्यत्सि कौ. उ. २।९
तेन मुह्यन्ति जन्तवः भ. गी. ५।१५
तेन वक्रतुण्डाय हुमिति यो जानीयात् सोऽमृतत्वं... च गच्छति ग. पू. १।१२
तेन वासनात्मकेन लिङ्गेनोत्पत्तिस्थितिलयानापद्यते सामर. १००
तेन वेषेण भूम्यादिलोकं व्याप्यानन्तयोजनमत्यतिष्ठत् (विराट् पुरुषः) मुद्गलो. २।२
तेन वै ते मृत्युमजयन्... संसारं चातरन् नृ. पू. २।१
तेन(आनुष्टुभमन्त्रेण) वै ते मृत्युमजयन्...संसारं चातरन् नृ.पू. २।१
तेन वै सर्वमिदमसृजत यदिदं किञ्च नृ. पू. १।१
तेन सत्येन तपसर्तुरस्म्यार्तवोऽस्मि कौ. उ. १।२
तेन सखिलोकेन सम्पन्नो महीयते छान्दो. ८।२।५
तेन सप्तद्वीपाधिपो भवति, भूःपतित्वं च गच्छति . ग. पू. १।१२
तेन (मंत्रज्ञानेन) सर्वज्ञानं भवति ग. पू. १।६

तेन सर्वमिदं प्रोतं तत्सत्यं तत्परं पदं	१ यो.त.१३६
तेन सर्वदेवाधिपत्यं विष्णुलोकाधिपत्यं च गच्छति	ग. पू. १।१२
तेन सर्वान्प्राणान्नयिमपु सन्निधत्ते	प्रश्नो. १।६
तेन सर्वैः क्रतुभिरिष्टं भवति	अ.शिरः. ३।१६
तेन सह मनोयुक्तं तारकं सुसंयोज्य ...भ्रूयुग्मं सावधानतया किञ्चिदूर्ध्वमुत्क्षेपयेत्	अद्वयता.६
तेन स्त्रीलोकेन सम्पन्नो महीयते	छान्दो. ८।२।९
तेन स्वयं त्वया ज्ञातं ज्ञेयं यस्य महात्मनः । भोगेभ्यो ह्यरतिर्जाता दृश्याद्वा सकलादिह	महो. २।७१
तेन स्वसृलोको महीयते	छान्दो. ८।२।४
तेन स्वेदमूत्रजलरक्तवीर्यरूपरसपुरुषादिकं प्राणः पृथक्कुर्यात्	शाण्डि. १।४।८
तेन ह वाव तत्कुलमाचक्षते, यस्मिन्कुले भवति...	बृह. १।५।२१
तेनाङ्गुलीमध्यमानात् सलिलमभवत्	गायत्रीर. १
तेनातुराः क्षीणलोकाश्च्यवन्ते	मुण्ड. १।२।९
तेनात्मना बहुज्ञेन निर्ज्ञाताश्चक्षुरादयः।.. दिष्ट्याऽस्मि विगतज्वरः	अ. पू. ३।९
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् । मूलमंत्रं विजानाति यो विद्वान्गुरुदर्शितम्	यो. शि. २।४
तेनाधीतं श्रुतं तेन... येन विप्रेण शिरसि त्रिपुण्ड्रं भस्मना धृतम्	बृ. जा. ५।८
तेनान्नपानलोकेन सम्पन्नो महीयते	छान्दो. ८।२।७
तेनान्योऽस्मत्समृच्छा तैतमस्मै प्रसुवामसि	सहवै. ५
तेनामृतत्वमश्याम्०	चित्यु.१०।१,४
तेनामृतत्वस्येशानं माऽहं पौत्रमघं रुद्रमिति न ह्यस्मात्पूर्वाः प्रजाः प्रयन्तीति	कौ. त. २।८
(पुत्र) ते नाम्ना मूर्धानमभिजिघ्रामि, असाविति...	कौ. त. २।११
तेनायजंत यद्चोऽध्यगीषत, ताः पथ आहुतयो देवानामभवन्	सहवै. १३
तेनासौ स्वविवेकेन स्वयमेव महामनाः । प्रविचार्य चिरं साधु स्वात्मनिश्चयमाप्तवान्	महो. २।२
तेनासौ लोको न सम्पूर्यते तस्माज्जुगुप्सेत	छांदो. ५।१०।८
तेनाई ज्योतिषा ज्योतिरानशान आक्षि, यत्कुसीदमप्रतीतं....	सहवै. ४
ते निचिक्युर्ब्रह्म पुराणमग्र्यम्	बृह. ४।४।१८
ते निबध्नन्ति नागेन्द्रमुन्मत्तं बिसतन्तुभिः ॥(विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो जयम्)	मुक्तिको. २।४७
ते नु वित्तोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन्	छां.उ. १।४।२
तेनेतिहासपुराणानां रुद्राणां शतसहस्राणि जप्तानिफलानिभवंति	पैङ्गलो. ४।२४
तेनेदं निष्कलं विद्यात् क्षीरात्सर्पिर्यथा तथा	ब्र.वि. १७
तेनेदंपूर्णंपुरुषेणसर्वम् [श्वेता.३।९+	महाना.८।१४
तेनेन्द्रस्य प्रियं धामोपेयाय [१ऐत.	२।३।१,२,३
तेनेमे प्राणाः, प्राणेभ्यः प्रजाः	मैत्रा. ६।३७
तेनेयमिन्द्रजालश्रीर्जगतिप्रवितन्यते । द्रष्टुर्दृश्यस्य सत्तान्तर्बन्ध इत्यभिधीयते	महो. ४।४७
तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमितिशंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै	छांदो. १।१।९
तेनेशितं (देवेन) कर्म निवर्तते ह	श्वेताश्व. ६।२
तेनैति (मार्गेण) ब्रह्मवित्पुण्यकृत्तैजसश्च	बृह. ४।४।९
तेनैव (ब्रह्मप्रणवेन) ब्रह्म प्रकाशते तेन विदेहमुक्तिः	प. हं. प. १०
तेनैव मुखेन मामन्नादं कुरु । श्येनस्त्व एकं मुखं, तेन मुखेन पक्षिणोऽत्सि	कौ. त. २।९
तेनैव रूपेण चतुर्भुजेन	भ.गी.११।४६
तेनैव शरीरेण देवतादर्शनं करोति	नृ. पू. १।५
तेनैषपूर्णःसवाएषपुरुषविधएव [तैत्ति.	२।२+३।४
तेनैषा खेचरी नाम मुद्रा ..बिन्दुः क्षरति नोयस्य..यावद्बिन्दुःस्थितो देहे तावन्मृत्युभयं कुतः	ध्या. बिं. ८३

तेनो एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति बृ. उ. १।५।२३
तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद छांदो. १।१।१०
ते पश्वादयस्ततस्थावरं ते ब्राह्मणादयः परमात्मैव निरालं. १०
तेऽपि चातितरन्त्येव भ.गी. १३।२६
तेऽपि मामेव कौन्तेय भ. गी. ९।२३
तेऽपि यान्ति परां गतिम् भ. गी. ९।३२
ते पुण्यमासाद्य सुरेन्द्रलोकं भ. गी. ९।२०
ते पिशाचास्ते मनुष्यास्ताः स्त्रियः (परमात्मैव) निरा. १०
ते पुनः पुरुषाग्नौ हूयन्ते बृ. उ.६।२।१६
ते पृथिवीं प्राप्यान्नं भवन्ति बृ.उ. ६।२।१६
तेऽप्यज्ञानतयानूनंपुनरायान्तियान्ति.. म.वा.र. ३
ते प्रकाश्याभिवदन्ति (आकाशादयः) प्रश्नो. २।२
ते (देवाः) प्रजापतिमुपधावन् , तेभ्य एतं मंत्रराजं नारसिंहं प्रायच्छत नृ. पू. २।१
ते प्राकाश्याभिवदन्ति (मा. पा.) प्रश्नो. २।२
ते प्राप्नुवन्ति मामेव भ. गी. १२।४
ते ब्रह्म तद्विदुः कृत्स्नं भ. गी. ७।२९
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यंतिसर्वे [महाना.८।१५ +मुण्ड.३।२।६
ते ब्रह्मलोकेषु परान्तकाले... परिमुच्यन्ति काले [कैव. ४+ भवसं. ३।३३
तेभिर्धार्यमिदं सूत्रं क्रियाङ्गं तन्तुनिर्मितम् परब्र. १७
ते भोगास्तानि भोज्यानि व्यासपुत्रस्य तन्मनः। नाजहुः... महो. २।२६
ते (शिवभक्ताः) भोगान्प्राप्य मुच्यन्ते प्रलये शिवविद्यया शिवो. १।३३
तेभ्यस्तज्ज्योतिरस्य सर्वस्य पुरतः सुविभा मविभातं...परमेव ब्रह्म भवति नृसिंहो. ६।२
तेभ्यस्तुर्यं महत्तरं (चाक्षुषादिभेदेभ्यः) मैत्रा. ७।११
तेभ्यः (वेदानधीतेभ्यः)श्राद्धं तु दत्तं चेत्तच्छ्राद्धं निष्फलं भवेत् / इतिहा. ७८
तेभ्यः (मरीच्यादिभ्यः) सर्वाणि भूतानि च सङ्कर्षणो. १
तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षा जाताः रु.जा. १
तेभ्यो (देवेभ्यो) एतं मंत्रराजं नारसिंहमानुष्टुभं प्रायच्छत् नृ. पू.२।१
तेभ्यो न सर्वमिव प्रतिपत्स्ये हन्ताहमन्यमभ्यनुशासानीति छांदो.५।११।३
तेभ्योऽब्रवीत्तमहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वाꣳस्तं चान्तर्यामिणं...मूर्धा ते विपतिष्यतीति बृह. ३।७।१
तेभ्योऽभितप्तेभ्यस्त्रयीविद्यासंप्रास्रवत् छांदो.२।२३।२
तेभ्यो भूतानि, तेनावृतमक्षरम् गोपालो.२।१३
तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त केनो. ३।३
तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार छांदो. ५।११।५
तेभ्योऽहं भागधेयं जुहोमि, ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु स्वाहा बृ.उ. ६।३।१
तेभ्यो हासावासुरः पाप्मा सच्चिदानन्दघनज्योतिरभवत् नृसिंहो. ६।१
तेभ्यो हैतदक्षरमुवाच द इति बृह. ५।२।१,२
तेभ्यो हैतामुपनिषदं प्रोवाच छांदो. ८।८।४
तेऽमुष्मिन्नादित्ये सृप्ताः छांदो. ८।६।२
ते मृत्योर्यन्ति विततस्य पाशम् कठो.४।२
ते मे अक्षन्नहमु ताननुक्षम् ब्रा.मं. २१
ते मे युक्ततमा मताः भ.गी. १२।२
ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धाꣳसत्यमुपासते तेऽर्चिरभिसम्भवन्ति बृ.उ.६।२।१५
ते यथा तत्र न विवेकं लभन्ते छांदो. ६।९।२
ते यदन्तरा तद्ब्रह्म तदमृतꣳस आत्मा प्रजापतेः सभां वेश्म प्रपद्ये छांदो.८।१४।१
ते यद्वयमनुसंहितमृचो धीमहे... ३ऐत. २।६।२
ते ये शतमाजानजानांदेवानामानन्दाः तैत्ति. २।८
ते ये शतमिन्द्रस्यानन्दाः तैत्ति. २।८
ते ये शतं कर्मदेवानां देवानामानन्दाः तैत्ति. २।८

ते ये शतं देवगन्धर्वाणामानन्दाः तैत्ति. २।८
ते येऽस्मद्यक्ष्ममनागसो दूरा-
दूरमचीचतम् सह्वै. ५
ते ये शतं देवानामानन्दाः स एक
इन्द्रस्यानन्दः तैत्ति. २।८
ते ये शतं पितॄणां चिरलोकलोकाना-
मानन्दाः.. तैत्ति. २।८
ते ये शतं प्रजापतेरानन्दाः..
स एको ब्रह्मण आनंदः तैत्ति. २।८
ते ये शतं बृहस्पतेरानन्दाः स
एकः प्रजापतेरानन्दः तैत्ति. २।८
ते ये शतं मनुष्यगन्धर्वाणामानन्दाः तैत्ति. २।८
ते ये शतं मानुषा आनन्दाः स
एको मनुष्यगन्धर्वाणामानन्दः तैत्ति. २।८
ते रागादयो दोषाः शरीरसंवलिताः सामर. १०१
ते रपसोऽभवन् कर्मादिष्वेतैर्जुहुयात्
पूतो देवलोकान्त्समश्नुते सह्वै. ११
तेऽर्चिरभिसम्भवन्त्यर्चिषोऽहरह्न
आपूर्यमाणपक्षमापूर्यमाणपक्षा-
द्यान्षण्मासानुदङ्ङादित्य एति
मासेभ्यो देवलोकम् बृह.६।२।१५
तेऽर्चिषमभिसम्भवन्ति छांदो. ५।१०।१
तेऽर्चिषो व यशस आश्रयवशा-
ज्जटाभिरूपा इव कृष्णवर्त्मनः मैत्रा. ६।३५
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः भ. गी. २।६
(अथ) ते वा एतस्यैवं यथैवेह
बीजस्यांकुरा वा.. मैत्रा. ६।३१
तेवाएतेगुह्याआदेशाएतद्ब्रह्माभ्यतपन् छान्दो. ३।५।२
ते वा एतेऽथर्वाङ्गिरस एतदिति-
हासपुराणमभ्यतपन् छान्दो. ३।४।२
ते वा एते पञ्च महापुरुषाः स्वर्ग-
स्य लोकस्य द्वारपाः छान्दो.३।१३।६
ते वा एते पञ्चान्ये पञ्चान्ये दश
सन्तस्तत्कृतं सर्वासु दिक्ष्वन्नमेव छान्दो.४।३।८
ते वा एते रसानां रसाः, वेदा
हि रसास्तेषामेते रसाः छान्दो. ३।५।४
ते वाऽभिवाद्यैवोप समीयुः आर्षे. १०।४
ते (देवाः) वायुप्रतिष्ठाकाशात्मानः
स्वर्ययुः कौ. २।१४
ते विदुरनेन वै न उद्गात्रात्स्ये-
ष्यन्तीति [बृह. १।३।२, ३,४,५,६,७
ते विदुर्युक्तचेतसः भ. गी. ७।३०
ते वै माभिसंविशतेति तथेति तं
समन्तं परिण्यविशन्त बृह.१।३।१८
ते वै सूत्रविदो लोके ते च
यज्ञोपवीतिनः ब्रह्मो. ११
ते शुक्रमेतदतिवर्तन्ति धीराः मुंड. ३।२।१
तेऽश्रद्दधाना बभूवुः प्रश्नो. २।४
तेषामभ्यर्हितमन्तर्गृहम् भस्मजा. २।८
तेषामसौ विरजो ब्रह्मलोको न
येषु जिह्ममनृतं न माया प्रश्नो. १।१६
तेषामहं समुद्धर्ता भ. गी. १२।७
तेषामात्रेयोऽच्छावदः सर्वाण्येवा-
वर्तयत् छाग. २।२
तेषामादित्यवज्ज्ञानं भ. गी. ५।१६
तेषामिन्द्रो जगतीमेव प्रतिसन्दिदेश शौनको. ४।१
तेषामिन्द्रो न प्रत्यपद्यत शौनको. १।१
तेषामिन्द्रो रुद्रानेव सेनान्यौकः शौनको. ३।१
तेषामिमंबिभ्यतएवाश्शूनुपाकल्पयत शौनको. ४।१
तेषामेतान्यमृतानि छान्दो. ३।५।४
तेषामेते रसाः (वेदाः) छान्दो. ३।५।४
तेषामेव पुनर्भवनं नो इहास्ति स्वसवे. १
तेषामेव सर्वदा स्वीकरणं भूपः भावनो. ८
तेषामेवानुकम्पार्थं भ. गी.१०।११
तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु
लोकेषु कामचारो भवति छान्दो. ८।४।३
तेषामेवैष ब्रह्मलोकः, येषां तपो
ब्रह्मचर्यं येषु ब्रह्म प्रतिष्ठितम् प्रश्नो. १।१५
तेषां के योगवित्तमाः भ. गी. १२।१
तेषां (कर्मेन्द्रियाणां) क्रमेण वचना-
दानगमनविसर्गानन्दाश्चैते
विषयाः... शारीरको. १
तेषां क्रमेण सङ्कल्पविकल्पाध्यवसाया-
भिमानावधारणास्वरूपाश्चैते
विषयाः शारीरको २
तेषां खल्वेषां भूतानां त्रीण्येव
बीजानि भवन्त्यण्डजं
जीवजमुद्भिज्जमिति छान्दो. ६।३।१

तेषां जरितारो बिभ्यत एव वसती-
